

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः



Checked 2012

M-785

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 785 विषय पुराण.
नाव. सर्वदेवप्रतिष्ठाविधी (MSS) ✓.
लेखक/लिपीकार कमलाकरभट्ट.
पृष्ठ 62 काळ शक 1653 पूर्ण/अपूर्ण

श्रीगणेशाय नमः ॥ नहोमरुस्नमाराध्या जलोत्सर्गमथो तु वा न्ह ॥ प्रतिष्ठां
सर्व देवानां नीलकंठो वदेत्यसौ ॥१॥ तत्र तत्कालानि वक्षु धर्मात्तिरे ॥ चैत्रे वा फा
ल्गुने वापि ज्येष्ठे वा माधवे तथा ॥ माघे वा सर्व देवानां प्रतिष्ठा शुभदा स्मृता ॥
रिक्ता त्यक्ति तिथिषु स्यात्सा वारे भौमात्मजे तु कृत थेति तथैव ॥ आषाढे द्वे तथा मू
लमुत्तरात्रयमेव च ॥ ज्येष्ठा रोहिण्य पूर्वाभाद्रपदा तथा ॥ अनुराधा [illegible] स्वा
तिप्रतिष्ठा सुप्रशस्यते ॥ इति नारसिंहेन थाम [illegible] भिनो मासं तमः [illegible]
मपदः देवी तत्र सदा शत्रु पांसुना पि प्रतिता ॥ भवते फलदा पुंसां कृ [illegible]
[illegible] षास्थित [illegible] तिथिर्न च नक्षत्रं नापवासोऽत्र कारणं ॥ माव भैरव वारा [illegible]

११

नारसिंहत्रिविक्रमाः॥महिषासुरस्यभ्रस्थाप्यावैदक्षिणायने॥कृचिंनिषेधः॥
आर्द्रादिकेस्वातिविरामकालेनक्षत्रवृंदेदशकस्थितेर्के॥विवाहचौलव्रतबं
धदीक्षासुरप्रतिष्ठादिनकार्यमेवेति॥अथसंभारः॥अर्कादिग्रहसन्निधा॥
प्रत्येकंअष्टशतंसंक्षेपपक्षे॥आज्यचर्वादि॥लोकपालादियागायपलाशस
मिधा॥पुष्पमाला॥कुंकुम॥कर्पूर॥कस्तूरि॥चंदन॥गुग्गुल॥धूपदहनं॥आरा
र्त्रिका॥पादुका॥दर्पण॥बलीसामग्री॥पायस॥भक्ष्य॥भोज्य॥नैवेद्य॥आज्य॥
तील॥यव॥अक्षता॥फलादिक॥प्रतिकुंडेविप्राश्चत्वारः॥प्रतिकुंडेस्रुक्स्रुवौ॥
आसनानि॥त्रीसूत्री॥श्वेतोर्णासूत्रं॥सर्वतोभद्रादिरचनार्थंनरक्तपीत

११

नीलकृष्णवर्णाः॥स्नपनकलशाः॥पंचपल्लवः॥कदलीस्तंभाः॥दशपताका॥द
शध्वजाश्च॥तेषांवैणवदंडाः॥वज्रमौक्तिक॥वैडूर्य॥शंख॥स्फटिक॥पुष्पराग॥
इंद्रनील॥महानील॥इतिरत्नाष्टकं॥हरिताल॥मनःशील॥अभ्रक॥कृष्णां
जन॥माक्षिक॥कांशास॥स्वर्णमाक्षिक॥गैरिक॥इतिधात्वष्टकं॥तिलाय
वमुद्ग॥गोधूम॥निवार॥श्यामाक॥सर्षप॥व्रीहयइतिबीजाष्टकं॥सुवर्णरज
तताम्रलोहत्रपुसीसरागरीत्याख्यइतिधात्वष्टकं॥मधुपर्कपात्रंसौवर्णंता
म्रंवा॥अर्घ्यपात्रं॥शान्त्यैकादिचिमाषसुवर्णशलाका॥स्थापनीयकलशः॥
षोडशाद्वारकलशाः॥कुंडकलशाःकुंडसंख्यया॥निद्राकलशाः॥स्नपन

।२॥

कलशाः ॥१५०॥ कलशसंख्यया शरावाणि ॥ धारासहस्रान्वितो द्रोकलशो ॥ गजा
श्वस्थानवल्मीकसंगमकूलह्रदयवराहोत्खातराजद्वारमृदः ॥ मुरामांसीवचाकु
ष्ठशैलेयनिशाद्वयसटीचंपकमुस्ताइतिदशसर्वौषधयः ॥ पंचरत्नं पृथक् २ ॥
व्रीहियवतिलगोधूममनीवारश्यामाकमुद्गइतिसप्तधान्यानि ॥ शय्यासोपस्करा ॥
श्वेतवस्त्रं ॥ चामरं ॥ दिव्यचित्रवितानं ॥ त्रयोदशकुलपट्टः ॥ ऋत्विग्वरणसामग्री ॥
शिल्पिवस्त्रसामग्री ॥ शिल्पिवस्त्रयुगं ॥ इत्यादिसंपादितसंभारानंदमूर्तिप्र
तिष्ठादिनात्प्राक्सप्तमदिने पंचमदिने त्रिदिने द्वितीयदिने सद्योवा प्रासादोग्रे ॥२॥
मंडपे हस्तात्मनान्यच्चतुरस्रां पंचहस्तां चतुर्हस्तां वा हस्तां छन्नां वेदिं सचामं

पा॰३
र्व४

डपोत्तरतः चतुरस्रं स्नानमंडपं कृत्वा तत्र वेदिकात्रयं च कृत्वा ॥ ततो यजमानः ॥ प्रा
णायामस्कृत्वा आचम्य प्राणानायम्य तिथ्यादिकं संकीर्त्य ॥ मम ब्रह्महत्याभ्रूणहत्या
महापापानि सकलपापक्षयकोटिगुणसर्वयज्ञतपोदानतीर्थवेदपुराणपुण्यफ
लप्राप्तये एकविंशतिसंख्याकमातृकुलपितृकुलपत्नीकुलनरकोत्तारणपूर्वक
वर्षकोटिसहस्रावधि नंदकैलोकेनरत्वेन तदुत्तरकालिकमहापार्थिवजन्मप्र
ग्रत्वबहुधनत्वरूपबाहुल्यविपुलभोगपूर्वकशायोत्तरकालिकयोगाद्युत्तरमोक्ष
प्राप्तिकामः अस्मिन् शिवलिंगे देवकलासांनिध्यार्थं श्रीपरमेश्वरप्रीत्यर्थं श्री
शिवप्रतिष्ठां करिष्ये ॥ तदंगभूतं गणेशपूजनं स्वस्तिवाचनं मातृकापूज

॥२॥

नं नांदीश्राद्धं आचार्यब्रह्मासदस्यऋत्विग्वरणं जलाधिवासं च करिष्ये ॥ ततो दिक्
पालरूपणादीक्षाचारः ॥ दंपत्योरुत्तरीयद्वयांते सफलाक्षत ग्रंथि बंधः ॥ देवस्यत्वे
त्यादि मंत्रेण समभिषेकः ॥ यदाबध्नं दाक्षायणेति यजमानकरे कुंकुमाक्तं सूत्र
बंधनं ॥ स्वस्तिन इति तिलककरणं ॥ दधिक्राव्ण इति दधिवंदनं ॥ कांडात्कांडा
दिति दूर्वामार्जनं ॥ अक्षन्नमीमदंतेत्यक्षतावंदनं ॥ ततोऽक्षतान्गृहीत्वा ॥ क
रोतु स्वस्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः ॥ सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्व
स्ति सर्वदा ॥ ययातिर्नहुषश्चैव धुंधुमारो भगीरथः ॥ तुभ्यं राजर्षयः सर्वे स्व
स्ति कुर्वंतु सर्वशः ॥ स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च ॥ स्वस्त्यस्त्वपा

॥३॥

दकेभ्यश्च नित्यं ते स्वस्त्ययनमस्तु ॥ इत्यक्षतान्हस्ते गृहीत्वा ॥ त्वं दीक्षितोऽसि नियमेन
स्थातव्य इति गुरुर्वदेत् ॥ व्रतेन त्वं ध्रुवक्षेमेति स्वस्वशाखामंत्रेण यजमाना
भिमंत्रणमिति ॥ ततो गणपतिपूजनादि नांदीश्राद्धांतं कृत्वा आचार्यादिवरणं
कुर्यात् ॥ तद्यथा ॥ अस्मिन् अमुककर्मणि आचार्यत्वेन त्वामहं वृणे ॥ इति कृत्वा ॥
आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेऽस्मिन् आचार्यो
भव सुव्रत ॥ इति पठित्वा वस्त्रालंकारादि दद्यात्प्रार्थयेत् ॥ मंत्रमूर्ति भवान्नाथ सं
सारोच्छेदकारक ॥ देवपूजा हि मनया स्यात्कुरु धर्मोऽस्ति ते नमः ॥ प्रतिष्ठादिविधा
वस्मिन्कुरु कर्म यथोदितं ॥ यथा शक्रस्य वागीशो आचार्यः सर्वकर्मसु ॥ त

४॥

थानयात्वमाचार्यो वृतोस्मिन्यज्ञकर्मणि ॥ त्वत्प्रसादाच्च पूर्तस्य समग्रं फलमा
प्नुयां ॥ संसारभयभीतेन अयं यज्ञः सुभक्तितः ॥ प्रारब्धः स्वत्प्रसादेन निर्वि
घ्नो न भवेदिह ॥ इत्याचार्यं प्रार्थ्य ॥ अस्मिन्कर्मणि भवन्तो मम ऋत्विजो भवतेति प्रार्थ्य
थाच ॥ अस्य यागस्य निष्पत्तौ भवन्तोभ्यर्थिता मया ॥ सुप्रसन्नाः प्रकर्तव्यं
तत्कर्म यथोदितमिति ॥ अस्मिन्कर्मणि ये यतुर्वरताः गुरुमुखा मया ॥ सावधा
नाः प्रकुर्वंतु स्वस्वकर्म यथोदितमिति प्रार्थयेत ॥ लेखाशेष ॥ ऋत्विजः अष्टौ द्वार

पालाः अष्टौ जापकाश्चेति एवं पंचविंशतिः ॥ अथवा ॥ अष्टौ होतारोष्टौ चा ५

त्वारो द्वारपालास्तावन्तो जापकाश्चेति सप्तदश वा ॥ अथावापत्यं कंबचारः ॥

छास्त्र

इति गुरुणा सहैव यावदंतं ॥ अशक्तो गुरुरेवैकः ॥ तदा शाखांतरीय कर्मलोपः ॥
ततः आचार्यस्य स्वशाखया अन्येषां यच्छाखीयं कर्म कुर्वंति तत्तच्छाखीय मधुपर्कः ॥
अथ जलाधिवासार्थं जलयात्रार्थं देवप्रबोधनार्थं च गच्छेत् ॥ अथ जलयात्रा
विधिर्लिख्यते ॥ श्रीवसिष्ठः ॥ शांतिकं पौष्टिकं वापि जलयात्रा च तत्र धीः ॥ कुरुते ६

योत
यदि वा मोहात्कर्म तस्य निःफलं ॥ १ ॥ तडागादिप्रतिष्ठासु देवतास्थापनादिषु ॥ लक्ष
होमे
क्षहोमे कोटिहोमे तीर्थेषु च ॥ २ ॥ व्रतोत्सर्गे महादाने यज्ञे चायतने शुभे ॥ जल
यात्रां पुरा कृत्वा पश्चात्कर्म समाचरेत् ॥ ३ ॥ अथातः संप्रवक्ष्यामि जलयात्राविधिं
शुभं ॥ यज्ञे सोल ... कृत्यं ऋत्विग्भिर्गुरुणा सह ॥ ४ ॥ यजमानः सपत्नीकः
सुहृद्बंधुजनैर्युतः ॥ अश्वारूढो गजारूढो वस्त्रालंकारभूषितः ॥ ५ ॥

मिति ८

गृहीत्वोपस्करं सर्वं गंधपुष्पाक्षतादिकं ॥ जलाशयांतिकं गच्छेद्गीतवादित्रनिस्व-
नैः ॥६॥ अग्निं दत्वा कुरंगं छिन्नदीवाथ समुद्रगां ॥ सुवासिन्योग्रतः कृत्वा सर्वालंका-
रभूषिताः ॥७॥ हेमरजततोम्राणां वा सन्नपात्रे कलशान् शुभान् ॥ गृहीत्वा गंधपुष्पा-
द्यैरर्चितान्सूत्रवेष्टितान् ॥८॥ जलाशयसमीपस्थां धरां गोमयलेपितां ॥ चतुर-
स्रं तत्र चैकेन स्वस्तिकं चालिखेत्तु ॥९॥ यवैर्वा तंदुलैर्वापि पद्ममष्टदलं लिखेत् ॥
चत्वारः कलशान्स्थाप्य चतुर्दिक्षु विचक्षणः ॥१०॥ तन्मध्ये पुनः स्थाप्य कोणे को-
णे समाहितः ॥ तत्र संपूजयेद्देवं वरुणं यादसांपतिं ॥११॥ जलमात्रांस्तु संपूज्य
जीवमात्रांस्तथैव च ॥ घृतेन नाथ दध्ना वा जले दद्यात्ततो बलिं ॥१२॥ अद्भ्यः स्वा-
हेति मंत्रेण द्वादश स्रुवकेण तु ॥ गृहीत्वाथ ततः कुंभान्वारिपल्लवसंयुतान् ॥१३॥

सुवासिन्योग्रतः कृत्वा पूर्वमंगलनिस्वनैः ॥ यागभूमिं समागच्छेन्मध्यमार्गे बलिं
क्षिपेत् ॥१४॥ यज्ञमंडपमाधस्थापयेद्दिक्पारि ॥ द्वारेण पश्चिमेनैव प्रवेश्य-
नंतरे पुनः ॥१५॥ साम्मुखाद्यग्रतो वापि यजमानोपवेशयेत् ॥ तस्याभिषेचनं कु-
र्यात्कलशस्थेन वारिणा ॥१६॥ मनसा चिंतयेद्देवं प्रधानं कर्म चाचरेत् ॥ अथ
जलयात्राप्रयोगः ॥ ओंतत्साज्ञानायन्य ॥ अद्य पसादिकालसानं स्मृत्वा अमुकक-
र्मांगभूतं जलयात्रां करिष्ये ॥ इति संकल्प्य ॥ ब्राह्मणानुज्ञातः स्वोपस्करणा-
नि कलशांश्च गृहीत्वाग्रे सुवासिनीः कृत्वाचार्यर्त्विग्भ्यः सह गीतवादित्रघो-
तिपाठयुक्तो यजमानो जलाशयं गच्छेत् ॥ ततो जलाशयसमीपप्रदेशं प्र-
क्ष्याल्य गोमयेन चतुरस्रमुल्लिख्य यवैस्तंदुलैर्वा रुस्वस्तिकपद्ममष्टदलं कार्यं

६॥

तुरस्त्रे मंडले स्थले ॥ बलिश्यापर्वतानामिति भूमिं ध्यात्वा मंडलस्याष्टदिक्षु तं
डुलपुंजान्कृत्वा तासु कलशान्स्थापयेत् ॥ ततः पुनंतु मामिति समभिर्दर्भपिंजूलैः
कलशानां पवित्रीकरणं ॥ गंधद्वारामिति कुंकुमगंधादिनानुलेपनं ॥ पुनंतु मेति षड्
स्तवनं स्थिरीकरणं ॥ कलशमूले ब्रह्माणं मध्ये विष्णुं कंठे रुद्रं चावाहयेत् ॥ इमं मे गं
गे इत्युदकपूरणं ॥ या ओषधीरिति सर्वौषधीः प्रक्षेपः ॥ हिरण्यगर्भ इति हिरण्यं ॥ यु
वा सुवासा इति व[illegible]नं ॥ वनस्पते शतवल्शा इति पंचपल्लवाः ॥ कांडात्कांडादिति
दूर्वाः ॥ ओषधीः प्रतिमोदध्वमिति पुष्पमालाः ॥ धूवाधीरिति धूपं ॥ श्रिये जात इति दी
पं ॥ अन्नपत इति नैवेद्यं ॥ घषत्विव कलशे सौमिति नमस्कारः ॥ ततो घटेषु गंगा
द्यावाहनं ॥ अपघेवरुणं देवमंभसां पतिमीश्वरं ॥ याचितं देहि मे तीर्थं सर्वपापा

॥६

पनुत्तये ॥ तपनस्य सुते देवि त्रिषु लोकेषु विश्रुते ॥ यजमानाभिषेकार्थं महापातकना
शनं ॥ सरस्वती नमस्कृत्य महेश्वरहरिप्रिये ॥ यजमानाभिषेकार्थं महापातकनाश
येत् ॥ इमं मे गंगे० ॥ त्वं नो देवि सरस्वति० ॥ पावकानः सरस्वति० ॥ सितासिते सरिते० ॥ आ
भारती गोमती० ॥ याः प्रवत इति प्रति गंधादिभिः पूजनं ॥ अथ स्थापित घटसमीपे
वरुणपूजा ॥ एह्येहि योगण वारिधीनां गणेन देवैरसह शस्त्रेभिः ॥ विद्याधरेंद्रा
मरगीयमानापाहि नमस्ते भगवन्नमस्ते ॥ तीक्ष्णायुधं तीक्ष्णगतिं दिगीशं चराचरे
शं वरुणं महांतं ॥ प्रचंडपाशांकुशवज्रहस्तं भजामि देवं कुलरक्षहेतोः ॥ २ ॥ इति ध्या
त्वा वरुणं तैः पूजयेत् ॥ ततो जलमातृकापूजनं ॥ कलशादाग्नेय्यां स्वस्तिकादौ कु
लसमाक्षतपुंजेषु मातृकास्थापनं ॥ तासां नामानि मत्सी कूर्मी च वाराही दर्दुरी नक्र

॥८॥

रीतथा॥भल्लुकी तंतुकी चैव सप्तैता जालमातृका॥मत्स्यैनमः॥मत्स्यां आवाहयामि॥कू
र्म्यै नमः॥कूर्मीं॥वाराह्यै नमः॥वाराहीं॰॥दर्दुर्यै नमः॥दर्दुरीं॰॥मकर्यै नमः॥मकरीं॥भल्लु
क्यै नमः॥भल्लुकीं॰॥तंतुक्यै नमः॥तंतुकीं॰॥प्रतिष्ठापूर्वकं पूजनं कुर्यात्॥अथ जीवमा
तृकापूजनं तत्रैव॥तद्यथा॥तस्मुरतः समाक्षतपुंजेषु ताः आह॥कुमारी धनदा नंदा
विमला मंगला बला॥पद्मा चेति च विख्याताः सप्तैता जीवमातृकाः॥कुमार्यै नमः॥कुमारीं॰
धनदायै नमः॥धनदां॰॥नंदायै नमः॥नंदां॰॥विमलायै नमः॥विमलां॰॥मंगला
यै नमः॥मंगलां॰॥बलायै नमः॥बलां॰॥पद्मायै नमः॥पद्मां आ॰॥गंधादिभिः पूजयेत्॥
तदग्रतः समाक्षतपुंजेषु स्थलमातृकापूजनं॥तामान्याह॥कूर्मी लक्ष्मी महामाया पा
नदैव्येतथैव च॥वारुणी निर्मला गोधाः सप्तैताः स्थलमातृकाः॥कूर्म्यै नमः॥कूर्मीं॰॥ल
क्ष्म्यै नमः॥लक्ष्मीं आ॰॥महामायायै नमः॥महामायां आ॰॥पानदैव्यै नमः॥पानदेवीं॰॥ ॥८॥

९२

वारुण्यै नमः॥वारुणीं॰॥निर्मलायै नमः॥निर्मलां॰॥गोधायै नमः॥गोधां॰॥गंधादिभिः पूज
नं॥ततो मंडलाद्बहिः रक्षदिक्षु दिक्पालानितत्तन्मंत्रैरावाह्य पूजयेत्॥समंततो दीपान्प्रज्वा
ल्य॥मंत्रेण विसृज्य स्थापितदेवतानां जलं प्रक्षेपः॥ततः अष्टम्यस्वाहेत्यादिमंत्रैः द्वादशा
हुताकृतीर्जले दद्यात्॥स्रुवेण घृतं गृहीत्वा॥ॐ अद्भ्यः स्वाहा॥अद्भ्य इदं॰॥वहंतीभ्यः स्वाहा॥
वहंतीभ्य इदं॰॥परिवहंतीभ्यः॰॥परिवहंतीभ्य इदं॰॥समंवहंतीभ्यः॰॥समंवहंतीभ्य इदं॰॥शीघ्रंव
हंतीभ्यः॰॥शीघ्रं वहंतीभ्यः॰॥शीघ्रं वहंतीभ्य इदं॰॥उग्रं वहंतीभ्यः॰॥उग्रं वहंतीभ्य इदं॰॥भीमं
वहंतीभ्यः॰॥भीमं वहंती इदं॰॥अंभोभ्यः स्वाहा॥अंभोभ्य इदं॰॥नभोभ्यः स्वाहा॥नभोभ्य इदं॰॥
महोभ्यः स्वाहा॥महोभ्य इदं॰॥सर्वस्मै स्वाहा॥सर्वस्मा इदं॰॥इति द्वादशाहुतयः॥ततो व
रुणप्रार्थना॥प्रतीचीशनमस्तुभ्यं सर्वाघविनिषूदन॥पवित्रं कुरु मे देव सर्वकार्येषु स
र्वदा॥ज्ञानतोऽज्ञानतो वापि भगवन्नच्युतं मम॥तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाज्जलेश्व

ल२

र॥ज्ञानतोऽज्ञानतो वापि यावद्विधिरनुष्ठितः॥स सर्वस्त्वत्प्रसादेन संपूर्णो भवतु प्रभो॥इ
ति वरुणं संप्रार्थ्य उत्तिष्ठ ब्रह्मणस्पत इति मंत्रेणानुत्थाप्य॥सुवासिनीनो हस्ते दत्वा॥यथेप्सि
ताचं कल्याणमिति मंत्रेण कुंभसूक्तान् पठन् गीतवाद्यादियुक्तो यज्ञमंडपमागच्छेत्॥इति जलयात्रा
विधिः॥अथ जलाधिवासनविधिः॥ततः शिल्पिस्थानात् प्रासाददक्षिणेन देवं जलाशया
तिकमानीय जलाधिवासनं कुर्यात्॥तत्र प्रकारः॥अथ पंचगव्यं पंचामृतादि दिग्द
त्वा तत्र वेदीं कृत्वा॥तदुपरि देवं स्थापयित्वा अश्मभिः शोधयित्वा पंचगव्यैर्भ्यां शोध
येत्॥आप्यायस्वेति पयः॥दधिक्राव्ण इति दधि॥घृतं मिमिक्षे इति घृतं॥गायत्र्या गोमूत्रं॥
पुरीष्यास इति गोमयं॥ततः जलाशयांतिकं नीत्वा तत्स्थाने तोरणपुष्पमालादिभिः शोभि
तं कुर्यात्॥ततः पीठोपरि पद्मं कृत्वा॥तत्र पद्मं जलोपरि स्थापयेत्॥अथ पीठस्याधोभा
गे ॐ आधारशक्त्यै नमः॥इत्याधारशक्तिं पूजयित्वा प्रार्थयेत्॥यदाधारे जगत्सर्वं

॥२॥

सप्तावरणसंयुतं॥लोकालोकसमाकीर्णं सप्तार्णवजलोद्भवं॥सर्वबीजसमायुक्तं प्रा
णशक्तिसमन्वितं॥सा त्वं धरस्व मत्स्थापीठं यत्र संस्थास्यते हरः॥इति प्रार्थ्य॥आधा
रशक्त्यै नमः इति बलिं दद्यात्॥ततः पीठस्य परितः प्रागादिषु अष्टदिग्गजान् स्थापयेत्॥
अक्षतान् गृहीत्वा॥ऐरावताय नमः॥पुंडरीकाय०॥वामनाय०॥कुमुदाय०॥अंजनाय०॥पु
ष्पदंताय०॥सार्वभौमाय०॥सुप्रतीकाय०॥८॥प्रत्येकं संपूज्य बलिं दद्यात्॥तथैव पीठ
स्य परितः अष्टदिक्षु दिक्पालान्॥त्रातारमिंद्रमित्यादिना आवाह्य संपूज्य बलीन् दद्यात्॥
ततः पीठोपरि अष्टमंगलद्रव्याणि विकिरेत्॥कस्तूरि॥कुंकुम॥केशर॥गोरोचन॥कर्पूर॥
चंदन॥नख॥कचोरा॥गफुल॥विन्यसेन्मध्यतस्तत्र विपुलं पाठिकाद्वयं॥ततस्तत्र अ
ग्रपाठिकायां वीरभद्रादिद्वारपालान्॥आवाह्य पूजयेत्॥वीरभद्राय नमः॥नंदिने नमः॥

१९

महाकालायनमः॥गणेशायनः॥वृषभायनमः॥भृंगिणेनमः॥स्कंदायनमः॥उमायैनमः॥चंडीश्वरा
यनमः॥ततःप्रथमं॥ध्रुवाद्यौरितिपीठाभिमंत्रणं॥अग्नेविश्वेभिरितिमध्यशीलाभिमंत्रणं॥
स्वेदक्षेरित्यूत्तरशीलाभिमंत्रणं॥ततःस्नापयित्वासमभ्यर्च्य लिंगंपीठिकयासह॥ततःआ
नकपिंडिकयासहलिंगमुद्धृत्यपीठिकायांस्थापयेत्॥ततआश्वस्तकंअधःसूत्रंपिंडिकावा
स्यपश्चिमे॥तत्रमंत्राः॥अपान्नपादिति॥एवंअन्यापिमूर्तयःताःयथानंस्थापयेत्॥ततः
यजमानःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यएवंगुणेत्यादिपुण्यतिथौअस्यदेवस्य
करिष्यमाणगर्भाधानादिसर्वसंस्कारेषुमध्येगर्भाधानपुंसवनसीमंतोन्नयनांतानां
क्षेत्रसंस्कारकत्वा॥अपांचसर्वबीजांकुरारंभकत्वेनब्रह्मांडादिसर्वक्षेत्रभूतत्वात्॥अप्सु
गर्भाधानादिसंस्कारत्रयंकरिष्ये॥इतिसंकल्प्य॥पुष्पाक्षतान्गृहीत्वा॥पुंषाणोआ
भगसत्यराधाइति॥अस्त्वग्नेसधिष्टव०॥सजातोगर्भोअसिरोदस्यो०रेषात्वावृषणं०॥

२५

१९

विष्णुर्योनिमितिसूक्तंजपेत्॥अथप्रार्थना॥या आपोमातृभूतादिजगदुत्पत्तिपोषयोः॥
तत्कृतोगर्भसंस्कारोलिंगेसमुपतिष्ठतां॥इति॥गर्भाधानंक्षेत्रसंस्कारद्वारापुरुषसंस्का
रमितिवचनात्॥अपुंसवनं॥दूर्वाक्षतपुष्पानादाय॥ओषधीःप्रतिमोदध्वमित्योषधीःप्र
पः॥हिरण्यगर्भःसमवर्तताग्रे०॥अद्भ्यःसंभृतः०इतिपुष्पाक्षतदूर्वाणामप्सुप्रक्षेपः॥सौम्ये
गर्भेहिसंजाताविरिंच्याद्यामहाधिपः॥महापुंसवनाह्यस्मात्तेस्मात्पुंसवनंस्मृतं॥एतेनपुंस्त्वे
सवनाख्येनकर्मणासंस्करोमिइत्यक्षतोदकंउत्सृजेत्॥आपोहयदितिपुष्पाक्षतदूर्वानादा
य॥सीमंतोन्नयनाख्यसंस्कारेणसंस्करोमीत्युक्त्वापुनःपुंसवनवत्॥ओषधीःप्रतिमोदध्वं॥
हिरण्यगर्भःसम०॥अद्भ्यःसंभृतः०प्रजापतिंमनसाध्यायेत्॥हवनप्रत्याम्नायभूतंब्राह्म
णायकिंचिद्धान्यंजलमुत्सृजेत्॥ततःउदुंबरस्तवककुशानतरूपैत्रेण्याच्छालत्याजेत्रिरस्याः

॥१०॥

कुर्यात् ॥ ॐ भूर्भुवस्वः ॥ अथ त्रिरालोडयति जले ॥ सोमो नो राजावतु मानुषीः प्रजा निविष्टचक्रा
सावीति ॥ सूत्रोक्तमंत्रः ॥ ब्राह्मणभोजनसंकल्पः ॥ एषु कर्मसु यथाशक्ति ब्राह्मणान्भोजयिष्ये ॥
अथ प्रार्थना ॥ विष्णोस्तयो बीजवद्रूपहारस्यासीमंतिनीगर्भभरेलयुक्ता ॥ सोयं भवद्भ्यो वि
दधातु कामान्सीमंतसंस्कारितनीरकैरणा ॥१॥ अस्मिंस्तदाशिवक्षेत्रे शिलाभूते विधानतः
कृतः सीमंतसंस्कारस्तेन तुष्यमे कर: ॥ ततः जलप्रार्थना ॥ अप्सु मे सोम० ऋक् ॥ समुद्रज्येष्ठाः सलि
लस्य सूक्तं ॥४॥ सर्वेषामेव बीजानां कारणानि जलानि तु ॥ जीवनं सर्वजंतूनां तेषु संस्थास्यते
हर: ॥ इत्युक्त्वा सपीठं सशिलं पिंडिकया सह हृदे वं जले स्थापयेत् ॥ इत्युपमन्युप्रोक्त जलाधिवा
सनविधिः ॥ अथ देवप्रबोधनं ॥ ॐ नमो भगवते सदाशिवाय सकलतत्वात्मिकाय सक
लतत्वविदूराय सकललोकैककर्त्रे सकललोकैकहर्त्रे सकललोकैकगुरवे सकललोकैक
साक्षिणे सकलनिगमगुह्याय सकललोकैकशंकराय शशांकशेखराय शाश्वत

सकललोकैकभर्त्रे

॥१०॥

निजावासाय निराभासाय निरुपम निराधाराय निःप्रपंचाय निर्लोभाय निर्द्वंद्वाय निरूप
मविभवाय नित्यशुद्धपरिपूर्णसच्चिदानंदाद्वयाय परमशांतप्रकाशतेजोमयाय ॐ जय जे
य महारुद्र महारौद्र भद्रावतार महाभैरव कल्यांतभैरव कालभैरव कपालमालाधर खट्
वांगखड्गचर्मपाशांकुशधर डमरूशूलचापबाणगदाशक्तिभिंडिपालतोमरमुस
लमुद्गरभुशुंडीप्रासपरिघशतघ्नीशतचंद्रायुधभीतभीषणाकर सहस्रमुखदं
ष्ट्राकरालविकटाट्टहासविस्फूरितब्रह्मांडमंडल नागेंद्रकुंडल नागेंद्रहारवलय ना
गेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक विश्वेश्वर विरूपाक्ष वृषभवाहन विषभूषण
विश्वतोमुख सर्वतोमुख रक्ष मां रक्ष मां नमस्ते नमस्ते ॥ इति स्तुत्वा ॥ जलोद्धृतं देवं आनी
य माने ऽत्र भुवं तु जंतवः ॥ इत्युद्बोधमंत्रः ॥ प्रबुध्यस्वाग्ने इत्यनेन ऋक् ॥ उद्बुध्यस्वाग्ने ॥ बोधामे
अस्य ऋक् ॥ अबोध्यग्निः समिधा ऋक् ॥ दधामीत्येन दंतं ॥ धामं तेन विश्वं भुवनं ॥ ऋक् ॥ स

॥११॥

मुद्रोसि॰ यदाकूतात्॰॥ अश्मः स्वाहेति॰ रुविष्णोर्नुकं वीर्याणि॰॥ नाभिमोनसे व्योषृतासु
तिः॰ परोमात्रयातन्वासूक्तं॥ अस्यवामस्यपलितस्य सूक्तं ऋ कू ५२॥ कद्रुद्रायप्रचेतसेसू
क्तं॥ इमारुद्रायतवसेसूक्तं॥ आतेपितर्मरुतां सूक्तं॥ इमारुद्रायस्थिरधन्वने सूक्तं॥ आ
वोराजानं ऋ कू॰ तवश्रियेमरुतः ऋ कू १॥ तमुष्टुहि ऋ कू १॥ त्र्यंबकं यजामहे॥१॥ इत्यादिवे
दसूक्तैः सात्वा संसृष्टे देवे तद्देवाग्निरित्यादि॥ अग्निस्तिग्मेन शोचिषा॰ चक्षुषः पिता॰ ८॥
इत्यादि वेदसूक्तैर्यस्य यावान्तरोपवेशावतासवनेनोच्चैः पठेत्॥ ततः गंगातीरे स्वस्ति
कनालिरस्य॥ तत्र देवं स्थापयित्वा॥ देवं जलात्ज्ञातमिति भावयित्वा॥ यजमानः आचम्य
प्राणानायम्य देवस्य लिंगस्य वा जातकर्माख्यं कर्म करिष्य इति संकल्प्य॥ तत्राय

॥११॥

क्रमः॥ यथावातः पुष्करिणीमिति कुशोदकेन देवस्य उत्पत्तिस्थानं प्रोक्ष्य॥ ततो

स्य॰

अपज्योतिर्तिषा इत्यनेन गोवालमलादिक्षालनं कुर्यात्॥ ततो मधुघृतं च देवमुखे दद्या
त्॥ प्रतेददामि सूत्रोक्तमंत्रः॥ अथ देवस्य नाभिनालस्य आयुष्यं करोति॥ अग्निरायुष्मा
निति त्रिः॥ कश्यपस्य त्र्यायुषं अगस्त्यस्य॰ यथा स्यदेवस्य लिंगस्य वा दीर्घकालेनापि
र्घ्यं थं वात्सप्रोपस्थानं कुरिष्ये॥ दिवस्परि प्रथमं मिति ऋ कू ११॥ इमन्नु प्राणेति
अ पूर्वतो ब्रूयात्॥ प्राणेति व्यानेति दक्षिणतः॥ व्यानेति पश्चिमतः॥ उदानेत्युत्तरतः॥ स
मानेति ऊर्ध्वं परस्य ब्रूयात्॥ अथ जातदेशाभिमंत्रणं॥ अश्माभव परशुर्भव॰ अथा
पोभिमंत्रयते॥ इडासीति॥ विभिद्यापुरमिति॥ यस्तेस्तन इति दक्षिणोत्तरं जलेन दे
वं अभ्युक्षेत्॥ इति जातकर्मविधिं संपाद्य॥ ततः अभ्यंगं घृतमादाय सर्वांगेषु देवं उद्व
र्तयेत्॥ पुनस्त्वादित्या इत्यादि॥ ततः संपादितमंगलद्रव्यैः देवं उद्वर्त्य स्थापयेत्॥ आ

॥१२१॥

ए५

पोऽस्मानिति वस्त्रेण जलं परिमार्ज्य तद्वस्त्रं शिल्पिने दद्यात् ॥ ततः पंचोपचारैः संपूज्य चंदनेनानुहृत्य पुष्पमालाभिरलंकृत्य पंचनीराजनेर्दीपैर्नीराज्य श्रिये जातः त्र्यरकू ॥ ततो बहिर्जले चभूतेभ्यो बलिं विकिरेत् ॥ गृहं तु पार्षदाः सर्वे शिव स्यानुचराः सदा ॥ मातरः प्रमथा ह्याभ्य बलिस्तोदनमुत्तमं ॥ स्कंदस्यानुचरा ये च ये च चंडीपरिग्रहाः ॥ तेग्रहंतु मया दत्तं बलिमोदनमुत्तमं ॥ इति बलिं दद्यात् ॥ पुनर्देवं नमस्कृत्य प्रार्थयेत् ॥ तद्यथा ॥ हिरण्मयांडप्रबभूव यस्मात्स एक आसीद्भुवनाधिपत्ये ॥ भूमिं तथान्या विदधानरस्मै देवाय कस्मै हविषा विधेम ॥१॥ हिरण्यगर्भः त्र्यरकू ॥ य आत्मदाः शौर्यं यदेवलोके यत्क्रमदेवाः समुपासयंति ॥ मृत्युर्जनस्या द्यत एव तस्मै दे० ॥ य आत्मदाः ० कू ॥ यः प्राणतः पालनतो महान्यो राजा बभूव विश्वजगस्य तिर्यः ॥ चतुष्पदां च द्विपदां च तस्मै दे० ॥ युः प्राणतो निमिषतो ॥ इमं हि मां श्रोः किरणस्य महांतं यस्यां बुधिं वेदमनि द्ययोऽनुः ॥ शैघ्रिकरा

॥१२१॥

स्य परायत स्मै देवाय० ॥४॥ यस्येमे हिमवंतः ० ॥ योरोदसी सर्वदृढे च कार स्वस्तंभितं येन जगत्त्रयं च यश्चांतरिक्षे विरराजतस्मै देवाय० ॥५॥ येन द्यौरुग्रा० ॥ यं क्रंदसी विस्तभिते तन्हांतं विलोकयामास नुरी शनत्ये ॥ यज्जोर विर्नाति शिवाय तस्मै देवाय क० ॥६॥ यं क्रंदसी अवस्या० ॥ आपो महत्यो यत एव विश्वं गर्भं दधाना अनुतारानेयाः ॥ प्राणाः सुराणां यत एव तस्मै दे० ॥ आपो ह यद्बृहतीः ० ॥७॥ यस्यायरेकस्य महत्त्वरूपं दक्षं क्रतुं लोकितुमीर्यमाणाः ॥ देवेषु चैकः प्रबभूव तस्मै दे० ॥८॥ यश्चिदापो० ॥ नो मां प्रहिंसाज्जनिता भुवस्वोयः सत्यधर्मा प्रजजानलोकं ॥ आपो बृहत्यो यत एव तस्मै देवा० ॥९॥ मानो हिंसीज्जनिता० ॥ ततः वाद्यरवे जायमानेन तोरणपुष्पमालालंकृते रथे देवं कूर्मशिलाश्च आधारशिलासहितं आरोप्य रथे तिष्ठेति प्रतिपठेत् ॥ अन्यानि चतदंगानि हरैरीन हेरभूदेवी शेष वृषभादिरूपाणि यथालाभं रथमारोप्य ॥ सौवर्णाद्यन्यतमं भानविभेत्याप्पूर्वोत्क्ये यासु वासिन्याः गृहीतचूतपल्लवादियुकलशहस्ताभिः शोभित

॥१२॥

श्रीसमाजं पुरतः कृत्वा बाद्यपुरःसरं अधिवासस्थानात्प्रासादप्रादक्षिण्येन देवं महामंडपमानीय मध्यमार्गे क्षेत्रपालाय बलिं दद्यात्॥ ओं नमो भगवते क्षेत्रपालाय भासुरत्रिनेत्र ज्वालामुख अवतर अवतर पिंगलऊर्ध्वकेश किलिकिलि ... ... धिरि धिरि हुरु हुरु घुरु घुरु चल चल हुंघ ह्रां ह्रीं ह्रूं नमः बलिं गृहाण स्वाहा॥ बंधुज्ञातिसमन्वितो ब्राह्मणसमन्वितो ब्राह्मणमंत्रघोषेण दुंदुभिरवैश्च देवं यजमानः प्रत्यागच्छेत्॥ मंडपद्वारसमीपसमाचारात्॥ यजमानस्यांतरे बलिं कुर्यात्॥ ततः आचार्योक्षतहस्तावारोपयेत्॥ तन्मध्ये भद्रासने दूर्वावस्त्रोत्तरपदे प्राङ्मुखं यजमानं पत्नीपुत्रसुहृद्वर्गमुपवेश्य स्वप्रत्यङ्मुखः ऋत्विग् उदङ्मुखः कलशस्थितं किंचित्किंचिदुदकं पात्रांतरे समादाय सप्तधान्यांकुरदूर्वांकुशायुक्तं पंचपल्लवैः स्नात्वाभिषिंचेत्॥ तत्कृत्वा॥ अभिषेकं मूर्ध्नि होमं मंगलं स्वस्तिवाचनं॥ भैषं च मंत्रपाठं च तिष्ठन्कुर्यात्सदैव हि॥ देवस्य ॥१३॥ त्वेति तिसृभिः॥ शिरो मे तिचतसृभिः यद्देवा देवहेडनमिति अनुवाकेन पुनंतु मेति नवभिः

पावमानेन सूक्तेन समुद्रज्येष्ठा इति चतसृभिः सुरास्त्वामभिषिंचन्त्वित्यादीनां समात्राभिषिंचनं तदनंतरं कलशस्थोदकेनं चोदकार्थः सर्वे विकार्याः इति जलयात्रा॥ ततः देवं आसने निधाय शिल्पिनस्तस्सपरिवारकांश्च वस्त्रालंकारगवादिभिः संपूज्य तान्समधमिति ब्रूयात्॥ इति देवप्रबोधनं॥ अथ मंडपपूजा॥ तत्रायं क्रमः॥ यजमानः सपत्नीकः पुत्रादियुतः आचार्यऋत्विक्सहितं संपूर्णकुंभकलशेन तूर्यध्वनो जायमाने भद्रं कर्णेभिरिति वेदघोषेण मंडपं प्रदक्षिणीकृत्य स्वस्त्ययनं सूक्तं पठेत्॥ सुवासिनीमग्रतः कृत्वा मंडपपश्चिमद्वारेण स्थित्वा॥ पृथिवीं ध्यायेत्॥ चतुर्भुजां भुव क्लां कूर्मदृष्टोपरिस्थितां पद्मशंखचक्रवरहस्तां॥ आगच्छ सर्वकर्माणि वसुधे लोकधारिणी॥ पृथिवी ब्रह्मदत्तासि काश्यपेनाभिवंदितेति भूमिं संप्रार्थ्य॥ पुष्पांजलिं सफलां दत्वा॥ उद्धृतासि वराहेण कृष्णेन

१४॥

शतबाहुना॥ दंष्ट्राग्रेलीनया देवि यज्ञाय प्रणमाम्यहं॥ ब्रह्मणा निर्मिता देवि विष्णुना रुद्र
करेण च॥ पार्वत्या चैव गायत्र्या स्कंदवैश्रवणेन च॥ येन त्वं पूजिते देवि धर्मस्य विजिगीषया॥
सौभाग्यं देहि पुत्रांश्च धनं रूपं च पूजिता॥ गृहाणार्घ्यं च मे देवि सौभाग्यं च प्रयच्छ ति॥ इत्यर्घं
दत्वा॥ जानुभ्यां धरणीगत्वा तद्द्वारेणैव मंडपं प्रविशेत्॥ द्वारेण पश्चिमेनैव प्रविशेद्दक्षिणे
नैतु॥ होमद्रव्यं च पूर्वेण दानार्थं दक्षिणेन तु॥ प्रतिष्ठार्थं च संभारानुत्तरेण प्रवेशयेत्॥
मंडपांतः पश्चिमतउपविश्य पंचगव्यं कुर्यात्॥ शुचीवोहव्येति आपोहिष्ठेति मंडपभूमिं प्रोक्ष्य॥
आचम्य प्राणानायम्य देशकालौ स्मृत्वा॥ अद्येत्यादि अमुककर्मांगत्वेन मंडपदेवतास्था
नोपवेदिकरिष्ये इति संकल्प्य॥ ईशानाभिमुखः स्थित्वा सिद्धार्थान्सर्वतो विकिरेत्॥ ॥१४॥
ततः अपवित्रः पवित्रो वा० अपक्रामंतु भूतानि० अपसर्पंतु० यदत्र संस्थितं० भूतानि राक्ष

सानपि यत्र तिष्ठंति के चन॥ ते सर्वे व्यपगच्छंतु देवयागं करोम्यहं॥ इति मंत्रैः॥ ततः कृतांजलिः
स्वस्त्ययनं तार्क्ष्यमिति तत्र हृदयं पठेत्॥ ततः पूर्वदिशि मंडपद्वाराद्बहिः हस्तमात्रे अश्वत्थं सुवर्ण
प्रभं माल्यवर्द्धिरि सहितं त्रिशूलांकितं सुशोभनं स्तंभं तोरणं॥ एह्येहि सुशोभन तोरणाय
तं यज्ञं रक्ष सर्वविघ्नान्निवारय॥ अग्निमीळे इत्यावाह्य वज्रसंघात पूर्वद्वार शतालयत्वं
दाधिपते नाम्ना सुशोभनं नमोस्तु ते॥ इत्यावाह्य ऋग्वेदाधिष्ठिताय सुशोभनतोरणाय न
मो नमः इति गंधपुष्पमालावस्त्रादीन्यस्य पूज्य॥ तोरणोपरि त्रिशूलं न्यस्य॥ त्रिशूलायु
नम इति प्रपूज्य॥ बृहस्पतितत्र न्यस्य॥ बृहस्पतिभ्यां नम इति पूजयेच्च॥ ततो मही द्यौ
रिति भूमिं स्पृष्ट्वा प्रार्थ्य॥ ओषधयः समितिर्यवान्॥ सप्तधान्यानि च क्षिप्त्वा॥ धान्यमसि
दितिए के कलशं पुंजोपरि निधाय॥ इमं मे गंगे इति तीर्थाद्भिरापूर्य गंधद्वारामिति गंधं क्षिप्त्वा
या ओषधीरिति सर्वौषधीः ओषधयः समिति यवान् कांडात्कांडादि दूर्वाः अश्वत्थे व इति पंच

१५॥

पल्लवान् स्योना पृथिवी इति सप्तमृदः॥ याः फलिनीरिति फलं॥ सहिरण्यानीति पंचरत्नानि॥
हिरण्यरूप इति हिरण्यं॥ युवा सुवासा इति वस्त्रेण रक्तसूत्रेण च वेष्टयेत्॥ पूर्णोदवं(?) वस्त्रैः
परिधाप्य पूर्णपात्रं निधाय तत्र भूवमावाह्य पूजयेत्॥ ततो दक्षिणे औदुंबरं सिंदूरांज
नप्रभं विंध्यसहितं त्रिशूलांकितं सुभद्राख्यं तोरणं एह्येहि सुभद्र तोरण एतं यज्ञं रक्ष सर्व
विघ्नानि वारय॥ ॐ इषे त्वोर्जे त्वा॥ नमस्ते धर्मराजाय दक्षिणद्वाराधिपाय च॥ यजुर्वेदाय
देवाय सुभद्रनाम्ने तोरणं॥ इत्यावाह्य यजुर्वेदाधिष्ठिताय सुभद्रतोरणाय नम इति गं
धादिना प्रपूज्य॥ तोरणोपरि त्रिशूलं न्यस्य त्रिशूलाय नम इति प्रपूज्य॥ तत्र सूर्यभौमौ
न्यस्य सूर्यभौमाभ्यां नम इति पूजयेत्॥ ततः पूर्ववत् कलशं संस्थाप्य तत्र धातामावाह्य(?)
पूजयेत्॥ ततः पश्चिमे नीलाक्षं सिंदूरप्रभं गंधमादनादिसहितं त्रिशूलांकितं सुभीमाख्यं तो

॥१५॥

रणं॥ एह्येहि सुभीम तोरण एतं यज्ञं रक्ष सर्वविघ्नानि वारय॥ ॐ अग्न आयाहि वीतये॥ न
मस्ते कामरूपाय पश्चिमद्वारपाय च॥ सामवेदाधिपस्त्वं हि नाम्ना कल्याणकारकः॥ इति चा
वाह्य सामवेदाधिष्ठिताय सुभीमतोरणाय नम इति गंधादिना प्रपूज्य तोरणोपरि त्रिशूलं
न्यस्य॥ त्रिशूलाय शूलाय नम इति प्रपूजयेत्॥ तत्र शुक्रबुधौ न्यस्य शुक्रबुधाभ्यां नम इ
ति पूजयेत्॥ पूर्ववत् कलशं निधाय तत्र वाक्पतिमावाह्य पूजयेत्॥ ततः उत्तरे न्यग्रोधं
स्फटिकप्रभं हिमवत्सहितं त्रिशूलांकितं सुप्रभाख्यं तोरणं॥ एह्येहि सुप्रभ तोरण एतं य
ज्ञं रक्ष सर्वविघ्नानि वारय॥ ॐ शंनो देवीरभिष्टये॥ नमस्ते दिव्यरूपाय अथर्वाधिप
ते प्रभो॥ कुबेराधिपतिर्नाम्ना मंगलस्योत्तराय च॥ इत्यावाह्य अथर्ववेदाधिष्ठिताय सुप्रभ
तोरणाय नम इति गंधादिना प्रपूज्य॥ तोरणोपरि त्रिशूलं न्यस्य त्रिशूलाय नम इति पूज

।१६।।

ग्वे

येत्॥ तत्र सोमकेतुमानीय स्य सोमकेतु शानिभ्यो नम इति गंधादिना प्रपूज्य॥ पूर्ववत्कलशं नि
धाय॥ तत्र विघ्नेशमावाह्य गंधादिना पूजयेत्॥ इति तोरणपूजनं॥ ततः पूर्वद्वारे शारवाद्वयेक
लशद्वयं चंदनोदकफलसमन्वितं कोपं चपल्लवेसर्वौषधीसुवर्णपंचरत्नाद्युतं दध्यक्षतविलि
पितं वस्त्रपुष्पमालाभ्यां चंदनचर्चितं रक्तसूत्रानन्तं पूर्ववन्मंत्रैः स्थापयेत्॥ प्रतिकलशं मंत्रावृत्तिः॥ ऐ
रावतं कलशे हृदये न्यस्य पूजयेच्च॥ ऐरावताय नमः इति पूजयेत्॥ कलशं परिच्छन्नं तैलेन वा
दीपादेयः॥ तत्र रौद्रीनोत्रात्व जौ पूर्वद्वारे शांतिसूक्तं जपाथत्वेनत्वा मह इत्यतो ऽस्मीति प्रति
वतिचनं पञ्चऋग्वेदः प्रप्रपत्रा ह्लोगायत्रः सोमदेवतः॥ अत्रिगोत्रस्य विप्रेंद्र इत्युक्त्वा तेन रक्षेन्नव॥
इति प्रत्येकं हुत्वा॥ अग्निमीळे पुरोहितं इति गंधादिना पूजयेत्॥ ततः सहस्राक्षमैरावतस्कंधे
तं किरीटिकुंडलधरं दक्षिणवामकरस्थवज्रोत्पलमिंद्रं ध्यात्वा॥ एह्येहि सर्वामरसिद्धसाध्यै ।।१६।।
रभिष्टुतो वज्रधरामरेश॥ संवीज्यमानो ऽप्सरसां गणेन रक्षाध्वरं नो भगवन्नमस्ते॥ भो इंद्र
इहागच्छ इह तिष्ठ। सांगं सपरिवारं सायुधं सशक्तिकं वज्रहस्तं कलशे योरावाहयामि इंद्र

मिति संपूज्य॥ आशुः शिशान इति पीतां पताकां पीतध्वजं च इंद्रप्रीतये पंचहस्तदंडे उच्छ्रयेत्॥ द्वार
शारवयो भूर्लोकाय नमः। भुवर्लोकाय नमः सुवर्लोकाय नमः। दक्षिणे ध्रुवाय नमः। वामे सोमाय
नमः। द्वारश्रियै नमः। ऊर्ध्वे देहल्यां। अधः वास्तुपुरुषाय नमः। वामस्तंभ योर्गणेशाय नमः॥ ब्रा
ह्म्यै नमः॥ माहेश्वर्यै॰ विष्णवै॰ मायायै॰ नंद्यै॰ धात्रे॰ विधात्रे॰ शंखनिधये॰ पद्मनिधये॰ कुबे
रयै गंगायै॰ यमुनायै॰ असितांगभैरवाय॰ इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः॥ शत
यज्ञाधिपो देवस्तस्मै नित्यं नमो नमः॥ इति नत्वा॥ इंद्राय सांगाय सपरिवाराय सायुधाय सशक्
तिकाय माषभक्तबलिं समर्पयामि॥ इंद्राय बलिं तौ दे॥ आचम्य॥ ततः अग्नेयां गत्वा पूर्ववत्कलशं
स्थापइत्वा लत्रपुंडरीकं अमृतं रुरुभैरवं च पूजयित्वा दीपादेयः॥ छागस्थं रक्तं दक्षिणवामकरहृय
धतशान्तिकमंडलुयज्ञोपवीतिनं अग्निं ध्यात्वा॥ एह्येहि सर्वामरहव्यवाहमुनिप्रवर्यैरभितो
भिजुष्टं॥ ततो वतालोकगणेन सार्द्धं ममाध्वरं पाहि कवे नमस्ते॥ भो अग्ने इहागच्छ इह तिष्ठ।

॥१७॥

सांगं सपरिवारं सायुधं सशक्तिकं कलशे आवाहयेत् नो अग्न इत्यग्निं गंधादिनात्र पूज्य । अग्निं
ईतमितिरक्तांपताकां रक्तध्वजं चतुष्कयेत् ॥ आग्नेयः पुरुषो रक्तः सर्वदेवमयोव्ययः ॥ धूम्रकेतुर
जोध्यक्षस्तस्मै नित्यं नमो नमः ॥ अग्नये सांगायेत्यादि० माषभक्तं बलिं समर्पयेत् ॥ आचम्य ॥ त
तः दक्षिणे गत्वा शाखाहृदये पूर्ववत्कलशं हृदयं निधाय ॥ वामन नामकं दिग्गजं न्यस्य वामनायनम
इति पूजयेत् ॥ दीपो देयः ॥ ततो यजुर्वेदिना ऋत्विजौ दक्षिणद्वारे शुभं तिसून्तूजपार्थं तेन त्वा नदं द
लोकृतो भस्मीति ॥ कानराक्षो यजुर्वेदस्त्वै हुम्भो विष्णुदेवतः ॥ काश्यपेयस्त्रिवियेन्द्र कृत्तिकं त्वं मेम
खम्भव ॥ प्रत्येकं दत्वा ॥ इषेत्वोर्जे चेति गंधादिनात्र पूज्य ॥ ततः महिषारूढं धृतदंडपाशं घंटं दक्षि
णवामकरद्वयं कृष्णाजिनं चिंत्योपम मग्निसमलोचनं यमं ध्यात्वा ॥ एह्येहि वैवस्वत धर्मराज सर्व ॥१७॥
मरैरर्चित धर्ममूर्ते । शुभाशुभानंदशुचाम धीश शिवायनः पाहि मखं नमस्ते ॥ ओ यमाय त्वा
गछ इति ॥ सांगं ० यमं कलशे योरावाह्य ॥ यमाय सोमं सुनुतेती मंत्रेण यमपूजा ॥ दक्षांप

त्रे ० विधात्रे ० शंखनिधये ० पद्मनिधये ० कलशहृदये ॥ रेवायै ० तापै ० ॥ कुम्भनभैरवायेति गंधा
दिभिः पूजयेत् ॥ पाशहस्तं च वरुणं अंभसांपतिमीश्वरं ॥ आवाहयामि यज्ञेस्मिन्वरुणायन
मो नमः ॥ नत्वा ॥ सांगायेत्यादिना पायसं दत्वा ० ततः ॥ आचम्य ॥ वायव्यां गत्वा पूर्ववत्कलशं तिष्ठा
प्यतत्र पुष्पदंतं सिद्धार्थं कपालभैरवं च पूजयेत् ॥ दीपो देयः ॥ मृगारूढं धूम्रवर्णं चित्रांबर
धरं युवानं वरध्वजं दक्षिण वामहस्तं हृदयं वायुं ध्यात्वा ॥ एह्येहि यज्ञे मम रक्षणाय मृगा
धिरूढः सह सिद्धसंघैः । प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते ॥ तो वा
योइहागछ ० सांगं ० कलशे आवाह्य ॥ तव वायविति वायुं पूजयेत् ॥ धूम्रां पताकां धूम्रध्व
जं च वायोयेते सरुस्त्रिणइत्यक्षयेत् ॥ वायुना कृष्णगं चैव पवनं वेगवद्गति ॥ आवाह
यामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतां ॥ जनाकारो महौजाश्च पश्चाद्दृष्टिगति दिवि ॥ तो
स्ते पूज्याय जगतो वायवे हनमामि ते ॥ वायवे सांगायेत्यादि ० बलिं समर्पयेत् ॥ ततः आ

ति २

।।१९।।

वमत्र उत्तरे गत्वा प्रतिद्वारं शाखं च कलशद्वयं स्थापयेत्।। तत्र सार्वभौमं दिग्गजं न्यस्य सार्वभौमा
यनम इति पूजयेत्।। दीपो देयः।। ततः।। अथर्ववेदाद्यृत्विजो उत्तरद्वारे गत्वा स्वजपार्थं तेन त्वा
मह इत्येतास्मि।। सूक्त नैत्रो धर्ववेदो नुष्टभो रुद्रदेवतः।। वैश्रवं पायने विशे इन्द्र त्विकु
वं मैमत स्वभवेति प्रत्येकं स्तुत्वा।। रंनो देवी तिगं धादिना प्रपूज्य।। ततो नरयुतो विमानस्थं
कुंडलहारकेयूररुचिरं वरदाभयदक्षिणवामभुजद्वयं मुकुटिनं महोदरं महाकायं हरि
तवर्णं कुबेरं ध्यात्वा।। एह्येहि यज्ञेश्वर यत्तर क्षाविधत्स्व नक्षत्रगणेन सार्धं।। सर्वौषधी
भिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते।। भो सोम इहागच्छ० सांगं० सोमं कलशे
यो रावाह्य।। सोमो धेनुमिति सोमं पूजयेत्।। हरितां पताकां हरितध्वजं च आप्यायस्वेत्यु

।।१९।।

च्छ्रयेत्।। द्वारश्रियै० ऊर्ध्वदेहल्यां।। अधः वास्तुपुरुषाय० स्तंभयोः महाकालाय० भृंगि
णे० चामुंडायै० महालक्ष्म्यै० चित्रगुप्तायै० मायाशान्त्यै० धात्रे० विधात्रे० शंखनिधये० प

ताकां सध्वजं च आयं गौरिति मन्त्रेण उच्छ्रयेत्।। ॐ द्वारश्रियै नमः ऊर्ध्वदेहल्यां अधः वास्तुपुरु
षाय नमः। स्तंभयोः पुष्पदंताय नमः।। कपर्दिने नमः।। कौमार्यै० वैष्णव्यै० चित्रगुप्तायै० मायाशान्त्यै०
धात्रे० विधात्रे० शंखनिधये० पद्मनिधये० गोदायै० सुभद्रायै० चंडभैरवाय० महामहिषनाक
ंदं दंडहस्तं महाबलं।। आवाहयामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यतां।। नत्वा।। यमायत्वांगायेत्या
दिमाषभक्तबलिं।। ततः आचार्य।। नैरृत्यां गत्वा पूर्ववत्कलशानि धाय।। कुमुदं दुर्जयं क्रोधभैर
वं च संपूज्य।। दीपो देयः।। ततः।। नरारूढं महाकायं खड्गहस्तं महाबलं।। नीलं वक्रं राक्षसं सर्व
रत्नैः तेपीतांबरं आभरण भूषितं निर्ऋतिं ध्यात्वा।। एह्येहि रक्षोगणनायक स्त्वं विशालवेतालपि
शाचसंघैः।। ममाध्वरं पाहि पिशाच नाथ लोकेश्वर स्त्वं भगवन्नमस्ते।। भो निर्ऋते इहा०
सांगमित्यादि० कलशे आवाह्य।। असुन्वंतमिति निर्ऋतिं पूजयेत्।। नीलां पताकां नीलध्व
जं च मोषुण इत्युच्छ्रयेत्।। निर्ऋतिं खड्गहस्तं च सर्वलोकैकपावनं।। आवाहयामि यज्ञेस्मि

॥१९॥

न्पूजेयं प्रतिगृह्यतां॥नत्वा॥सांगायेत्यादि निर्ऋतये एतं माषभक्तबलिं समर्पयामि॥ततः आ
वाय्यपश्चिमे गत्वा तत्र शंखाह्वये कलशे हृदयं निधाय अंजनाख्यं दिग्गजं तत्र न्यस्य॥अंज
नाय नम इति पूजयेत्॥दीपो देयः॥सामवेदादृत्विजो पश्चिमद्वारे शांतिसूक्तजपार्थत्वेन
त्वामहं वृणे॥वृतोस्मि॥सामवेदस्तु पिंगाक्षो जागतः शक्रदैवतः॥भारद्वाजसगोत्रेश्च विप्रेंद्र ऋ
त्विक्त्वं मे मखे भव॥इति प्रत्येकं वृत्वा॥अग्न आयाहीति गंधादिपचारैः पूजयेत्॥ततो
मकरस्थं पाशहस्तं शुक्लवर्णं किरीटधारिणं वरुणं ध्यात्वा॥एह्येहि यादोगणवारिधी
नां गणेन पर्जन्यसहाप्सरोभिः॥विद्याधरेंद्रामरगीयमानः पाहि त्वं मखं स्वान्नगवन्नम
स्ते॥ॐ वरुण इहागच्छ॰ सांग॰ वरुणं कलशे शाखायामावाह्य॥तत्त्वायामीति वरुणं पूजयेत्॥प
श्चे तां पताकां श्वेतध्वजं च दत्वा मे वरुण इत्युच्छ्रयेत्॥ॐ हारश्रियै नमः ऊर्ध्वदेहल्यां अधः
वास्तुपुरुषाय॰ स्तंभयोर्नंदिने॰ चंडाय॰ वाराह्यै॰ रुद्राण्यै॰ विघ्नेशायै॰ मयाकान्तायै॰ धा

॥१९॥

मनिधये न॰ कुशाह्वयेताये॰ वैष्णव्यै॰ भीषणभैरवाय॰ सर्वनक्षत्रमध्येतु सोमो राजा
व्यवस्थितः॥तस्मै सोमाय देवाय नक्षत्रपतये नमः॥सोमायेत्यादि माषभक्तबलिं॰॥ततः ऐ
शान्यां ईशान्यां गत्वा पूर्ववत् कलशं प्रतिष्ठाप्य॥तत्र सुप्रतीकं दिग्गजं मंगलं चेतसद्वार भैरवं
च पूजयेत्॥दीपो देयः॥वृषारूढं दक्षिणवामहस्तयोर्वरत्रिशूलधरं त्रिनेत्रं शुक्ल
वर्णं ईशानं ध्यात्वा॥एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वांगगणेन सार्धं॥लोकेन
यज्ञेश्वर यज्ञसिध्यै गृहाण पूजां भगवन्नमस्ते॥ॐ ईशान इहागच्छ इह तिष्ठ॥सांगं॰
मित्यादि॰ ईशानं कलशे आवाह्य॥तमीशानमिति गंधादिभिः पूजयेत्॥श्वेतां स
र्ववर्णां वा पताकां ध्वजं च अभित्वा देव सवितरित्युच्छ्रयेत्॥वृषस्कंधे समारूढ शूलह
स्तं त्रिलोचन॥आवाहयामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यतां॥सर्वाधिपो महादेव ईशा
नः शुक्ल ईश्वरः॥शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नमः॥नत्वा॥सांगायेत्यादि॰

॥२०॥

माषभक्तबलिं० ततः आचम्य ईशानपूर्वयोर्मध्ये ॥ ऊर्ध्वमुद्दिश्य अक्षसूत्रकुशमुष्टिधरो
र्ध्वाधोदक्षिणकरं स्रुक्स्रुवं च कमण्डलुधरोर्ध्वाधो वामकरद्वयं चतुर्भुजं चतुर्मुखं बोदरं
रक्तवर्णं ब्रह्माणं ध्यात्वा ॥ एह्येहि सर्वाधिपते सुरेंद्र लोकेन सार्धं पितृदेवताभिः ॥ स
र्वस्य धाता स्वमितप्रभावो विशाध्वरे नः सततं शिवाय ॥ ओं ब्रह्मन्निहागच्छ इह तिष्ठ सां
गं० ब्रह्माणं आवाह्य ॥ ब्रह्मणस्पते सुयमस्येति गंधादिभिः संपूज्य ॥ अंतरिक्षाय पूर्व० रक्तां
पताकां रक्तध्वजं च ब्रह्मणस्पते त्वमस्येत्यर्पयेत् ॥ पद्मयोनिश्चतुर्मूर्तिर्वेदवासः पितामहः
॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ॥ नत्वा ॥ ब्रह्मणे सांगायेत्यादि० बलिं० ॥ ततः
आचम्य ॥ पश्चिमनैर्ऋत्योर्मध्ये ॥ अधः उद्दिश्य अनंतशायनासीनं फणासप्तकमंडितं
पद्मशंखधरोर्ध्वाधोदक्षिणकरद्वयं चक्रगदाधरोर्ध्वाधो वामकरद्वयं नीलवर्णं अनंतं
ध्यात्वा ॥ एह्येहि पातालधरामरेंद्र नागांगनाकिंनरगीयमाना ॥ यक्षोरगेंद्रामरलोकसं ॥२०॥

धिरनंतरक्षाध्वरमस्मदीयं ॥ ओं अनंत इहागच्छ इह तिष्ठेति सांगायेत्यादि० अनंतमावाह्य ॥ यस्या अ
नंत इति मंत्रेण अनंताय नम इति गंधादिभिः पूजयेत् ॥ भूमिं च पूजयेत् ॥ मेघवर्णां पताकां श्वे
तध्वजं च नमोस्तु सर्पेभ्य इत्युच्चरयेत् ॥ योसावनंतरूपेण ब्रह्मांडं सचराचरं ॥ पुष्पवद्धारयेन्मू
र्ध्नि तस्मै नित्यं नमो नमः ॥ नत्वा ॥ अनंताय सांगायेत्यादि एतं माषभक्तबलिं० ततः आचम्य पं
डपमध्ये चित्रचामरकिंकिणीयुतः ॥ अस्तु च दंडो दशहस्तदीर्घः त्रिहस्तविस्तृतो महाध्वजो
विचित्रवर्णः इंद्रस्य वज्रइति मंत्रेण स्थाप्यः ॥ ब्रह्मजज्ञानमिति च तत्रैव ब्रह्मपूजनं कार्यं ॥
ततो मंडपषोडशस्तंभेषु सर्वेभ्यो देवेभ्यो नमः ॥ वंशेषु किंनरेभ्यो नमः ॥ पृष्ठे पन्नगेभ्यो न
म इति पूजयेत् ॥ केचित् ॥ प्रसवं स्तंभदेवता ईशानादिप्रदक्षिणाक्रमेण पूजयेदित्या
हुः ॥ तद्यथा ॥ ईशानस्तंभे ब्रह्मजज्ञानमिति ब्रह्माणं पूजयेत् ॥ एह्येहि ब्रह्मंस्तत्र ब्र
ह्मस्तंभे गंधादि प्रतिगृह्यतां ॥ एवमन्येष्वपि द्वितीये इदं विष्णुरिति विष्णुं ॥ तृतीयेन

॥२१॥

मः शंभवेतिशंभुं। चतुर्थे त्रातारमिंद्रेतीइंद्रं। पंचमे चित्रं देवानामिति भास्करं। षष्ठे गणानां त्वेति विनायकं। सप्तमे यमाय सोममिति यमं। अष्टमे आयं गौरिति सर्पान्। नवमे अश्विना वर्त्तिरस्मदश्विनौ। दशमे मरुतो यस्य हीति मरुतः। एकादशे उद्घंन येति मार्त्तंडं। द्वादशे वा यवायाहीति वायुं। मध्ये वेदिकोणे ईशान स्तंभे त्र योदशे ज्मया अत्रेति वसून्। चतुर्दशे तमु ष्टापाथ्य इति पुरंदरं। पंचदशे बृहस्पत इति गुरुं। षोडशे विश्वकर्मन्हविषेति विश्वकर्म णं। ततः मंडपाद्बहिः पूर्वस्यां दिशि किंचिद्भूमिमुपलिप्य। तत्रोपविश्य। त्रैलोक्यया निभूता नि स्थावराणि चराणि च। ब्रह्मविष्णुशिवास्सार्द्धं रक्षां कुर्वंतु तानि मे। देवदानवगंधर्वा यक्षराक्षसपन्नगाः। ऋषयो मानवा गावो देवमातर एव च। सर्वे ममाध्वरे रक्षां प्रकुर्वंतु मुदान्विताः। ब्रह्माविष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह। रक्षंतु मंडपं सर्वे घ्नंतु रक्षांसि सर्वतः। त्रैलोक्यस्थेभ्यस्स्थावरेभ्यो भूतेभ्यो नमः। त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः॥ ॥२१॥

ॐ ब्रह्मणे नमः। विष्णवे नमः। शिवाय०। देवेभ्यो०। दानवेभ्यो नमः। गंधर्वेभ्यो०। यक्षेभ्यो० राक्षसेभ्यो०। पन्नगेभ्यो०। ऋषिभ्यो०। मनुष्येभ्यो०। गोभ्यो०। देवमातृभ्यो०। इति प्रत्येकं संपूज्य॥ पुष्पादिना पूर्वमंत्रैरेव तस्यां भूमौ एतेभ्य एव माषभक्तबलिं दद्यात्॥ ततो यजमानः॥ साचार्यः सऋत्विक् प्रक्षालितपाणिपाद आचांतः आग्नेयद्वारेण मंडपं प्रविशेत्॥ इति च्च न्वेदमंत्रैर्मंडपप्रतिष्ठा समाप्ता॥ यजुर्वेदादयस्तत्तत्स्वमंत्रैः कुर्युः॥ ततो वेद्युपरि जलं श यवव्रीहिः उद्धरणं सर्वतोभद्रं वा कृत्वा तत्र मंडलदेवता आवाहयेत्॥ तद्यथा॥ ब्रह्मजज्ञा नमित्यनेन पुष्पाक्षतैः मंडलकर्णिकायां ब्रह्मणे नम इति ब्रह्माणं आवाहयामि॥ मं डलाद्बहिः प्रागादिक्रमेण तत्तन्मंत्रैः लोकेशान् त्रातारमिंद्रमिति इंद्राय नमः॥ इंद्रं०। अ ग्निं दूतमिति अग्नये०। अग्निं०। यमाय सोममिति यमाय०। यमं०। मोषुण इति निर्ऋतये०। नि र्ऋतिं०। तत्त्वायामीति वरुणाय०। वरुणं०। तव वायविति वायवे०। वायुं०। सोमो धेनुमिति सो

माय॰ सोमं॰ तमीशानमितिईशानाय॰ ईशानं॰ ईशानक्रौरीतराले वसूनांवेति वसुभ्यो॰ वसून्॰
रुद्राग्न्यंतराले सहस्त्राणि सहस्त्रइति रुद्राय॰ रुद्रं॰।अग्नियमांतराले वर्णमहांअसी
२२। तिआदित्येभ्यो॰ आदित्यान्॰।यमनिर्ऋत्यंतराले मरुतोयस्यहीतिमरुद्भ्यो॰ मरुतः॰
निर्ऋतिवरुणांतराले विश्वेदेवासइतिविश्वेभ्यो देवेभ्यो॰ विश्वांदेवान्॰ वरुणवायव्यंत
राले यज्ञेनयज्ञमितिसाध्येभ्योदेवेभ्यो॰ साध्यादेवान्॥वायुसोमांतराले याबांकशेत्य
श्विभ्यां॰ अश्विनौ॰ सोमेशांतराले यदक्रंदइतिस्कंदाय॰ स्कंदं॰।ब्रह्मेंद्रांतराले इदंवि
ष्णुरितिविष्णवे॰ विष्णुं॰।।ब्रह्माग्न्यंतराले गणानांत्वेतिगणपतिं॰।ब्रह्मयमयोर्नमोऽस्तु
दीर्घतामवरइतिपितृन्॥ब्रह्मनिर्ऋत्यंतराले अप्सरसांगंधर्वाणामितिगंधर्वाप्स
रोभ्यो॰ गंधर्वाप्सरसः॰ ब्रह्मवरुणांतराले गौरीर्मिमायेतिसप्तमातृभ्यो॰ सप्तमा ।।२२।
तॄः॰ ब्रह्मवायव्यंतराले नमोऽस्तु सर्पेभ्यइति सर्पेभ्यो॰ सर्पान्॥ब्रह्मसोमांतराले जात
वेदसइतिदुर्गायै॰ दुर्गां॰ ब्रह्मेशांतराले गंगायमुनाभ्यां॰ गंगायमुने॰ मंडलातःप
रंमंडगंगाइति १

शान दलेष्वेभ्यास्तुतिभिः दक्षायनमः॰ दक्षंआवाह॰।पूर्वेविष्णवेनम॰ विष्णुं॰।आग्नेय्यांदुर्गायै॰
दुर्गां॰ दक्षिणेस्वधायै॰ स्वधां॰।नैर्ऋत्येमृत्यवे॰ मृत्युं॰।पश्चिमेरोषाय॰ रोषं॰।वायव्येउदधीत्ये
उदधिं॰।सौम्येमरुद्भ्यो॰ मरुतः॰।मध्येगणपतये॰ गणपतिं॰।ब्रह्मणः पादमूले कर्णिकायांपृथिव्यै॰
पृथिवीं॰।तदुपरिस्थापयदेवंब्रह्मोपरितः पूर्वादिक्रमेण ऋग्वेदाय॰ ऋग्वेदं॰ यजुर्वेदाय॰ यजुर्वेदं॰
सामवेदाय॰ सामवेदं॰।अथर्ववेदाय॰ अथर्ववेदं॰ मंडलाद्बाह्ये पूर्वादिक्रमेणदिक्पालायुधानि व
ज्रायु॰ वज्रं॰ शक्तये॰ शक्तिं॰।दंडाय॰ दंडं॰ खड्गाय॰ खड्गं॰ पाशाय॰ पाशं॰ अंकुशाय॰ अंकुशं॰
गदायै॰ गदां॰ त्रिशूलाय॰ त्रिशूलं॰।।तद्बाह्ये तेषांवाहनानि॥ऐरावताय॰ ऐरावतं॰ मेषाय॰
मेषं॰।महिषाय॰ महिषं॰ नराय॰ नरं॰ मकराय॰ मकरं॰।मृगाय॰ मृगं॰ शिबिकायै॰ शिबि
कां॰।वृषाय॰ वृषं॰ तद्बाह्ये गौतमाय॰ गौतमं॰ भरद्वाजाय॰ भरद्वाजं॰ विश्वामित्राय॰ विश्वामि
त्रं॰ कश्यपाय॰ कश्यपं॰ जमदग्नये॰ जमदग्निं॰ वसिष्ठाय॰ वसिष्ठं॰ अत्रये॰ अत्रिं॰ अरुंधत्यै॰

॥२३॥

अरुंधतीं॰तद्बाह्ये ग्रहान्॥सूर्याय॰सूर्यं॰सोमाय॰सोमं॰भौमाय॰भौमं॰बुधाय॰बुधं॰॥बृहस्प
तये॰बृहस्पतिं॰शुक्राय॰शुक्रं॰शनैश्चराय॰शनैश्चरं॰राहुकेतुभ्यां॰राहुकेतू॰॥तद्बाह्ये ऐंद्र्यै॰
ऐंद्रीं॰कौमार्यै॰कौमारीं॰ब्राह्म्यै॰ब्राह्मीं॰वाराह्यै॰वाराहीं॰चामुंडायै॰चामुंडां॰वैष्णव्यै॰वैं॰
माहेश्वर्यै॰माहेश्वरीं॰॥वैनायक्यै॰वैनायकीं॰॥एवं सर्वतोभद्रदेवतास्थापनं कृत्वा संपूज्य॥
अथाचार्यः॥अग्न्यायतनं संमृज्य कुशोदकेन संप्रोक्ष्य॥इदं विष्णुरिति मंत्रेण उपरि मेखला
यां श्वेतवर्णालंकृतायां विष्णुमावाहयामि॥मध्यमेखलायां रक्तवर्णालंकृतायां ब्रह्मजज्ञान
मिति ब्रह्माणं॰अधोमेखलायां कृष्णवर्णालंकृतायां कद्रुद्रायेति मंत्रेण रुद्रं॰॥गौरीर्मिमाये
ति मंत्रेण योन्यां गौरीं॰एतान्प्रत्येकं संपूज्य॥कुंडे अग्निं प्रतिष्ठाप्य॥चरुश्रपणादि हविरासाद
नांतं कृत्वा ततः सर्वेपि होतारः स्वमेवाग्निं स्वस्वकुंडे प्रणयेयुः॥तं चतुर्थीकर्मांतं रक्षेयुः॥अद्ये
त्यादि अमुककर्म कर्तुं रक्षाविघ्नोपशमनसंपन्नकामो वास्तुपूजनमहं करिष्ये॥ततो मंडपनै

॥२३॥

र्ऋत्यकोणे मदाहस्तमितां द्विहस्तां वा वेदीं विधाय वेद्याश्चतुर्षु कोणेषु आग्नेयादिषु चतुरः शं

कून्॥ओं विशंतु भूतले नागा लोकपालाश्च सर्वतः॥मंडपेत्रावतिष्ठंतु आयुर्बलकराः सदा॥१॥
अनेन मंत्रेण रोपयेत्॥प्रतिरोपणं मंत्रावृत्तिः॥शंकुपार्श्वे माषभक्तबलिं प्रागाग्नेयादिक्रमेण
दद्यात्॥अग्निभ्योप्यथ सर्पेभ्यो ये चान्ये तान्समाश्रिताः॥तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमं॥१॥
ॐ नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः॥बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमं॥२॥ॐ
नमो वायुरक्षेभ्यो ये चान्ये तान्समाश्रिताः॥बलिं तेभ्यः प्रयच्छामि सर्वे गृह्णंतु मांचितं॥३॥रुद्रेभ्य
श्चैव सर्पेभ्यो ये चान्ये तान्समाश्रिताः॥बलिं तेभ्यः प्रयच्छामि गृह्णंतु सततोत्सुकाः॥४॥इति मंत्रच
तुष्टयेन बलिचतुष्टयं दद्यात्॥ततो वेद्युपरि वस्त्रं कुंकुमादिना सुवर्णरजतादिशलाकया नवरे
खाः कुर्यात्॥रेखासु देवताः॥ॐ लक्ष्म्यै नमः॥ओं यशोवत्यै॥ॐ कांतायै॰सुप्रियायै॰ॐ विम
लायै॰श्रियै॰ॐ सुभगायै॰ॐ सुमत्यै॰इडायै॰॥एताभिः प्रागग्रा उदक्संस्था नव रेखाः कृत्वा॥ॐ
धन्यायै॰ॐ आपायै॰ॐ विशालायै॰स्थिरायै॰भद्रायै॰जयायै॰निशायै॰विरजायै॰विभवा

शुद्धवर्णाय० रक्तवर्णाय०५

॥२४॥

ये०॥ एतानि इंद्रादयः स्वकस्थाने वरेरवाः कृत्वा॥ यथोक्तमंडलं कृत्वा॥ मध्यपंकजे मंडूकादिपीठदेव
ताः पूजयेत्॥ तद्यथा॥ पद्ममध्ये॥ ॐ मंडूकाये० ॐ कालाग्निरुद्राय नमः॥ कूर्माय० वराहाय० अनंताय
पृथिव्यै० क्षीरोदाय० कुबेराय० नलाय० पद्माय० पत्रेभ्यो० केसरेभ्यो० कर्णिकायै० सिंहासनाय०॥म।न
पूर्वादिचतुर्दिक्षु पत्रेषु॥ ॐ धर्माय०। ज्ञानाय० वैराग्याय० ऐश्वर्याय०॥ विदिक्षु पत्रेषु॥ ॐ अधर्माय०
अज्ञानाय० अवैराग्याय० अनैश्वर्याय०। पद्ममध्ये ॐ सं सत्वाय० रं रजसे० तं तमसे० रूक्षवर्णा
य० अग्निमंडलाय० सोममंडलाय० सूर्यमंडलाय० आत्मतत्वाय० कालतत्वाय० विद्यातत्वाय० शि
वतत्वाय० आत्मने० अंतरात्मने० जीवात्मने० परमात्मने० पद्मस्य पूर्वादिक्रमेण॥ अणिमायै० म
हिमायै० लघिमायै० गरिमायै० प्राप्त्यै० प्राकाम्यै नमः॥ ईशितायै० वशितायै० पद्ममध्ये सर्वसिद्ध्ये
०॥ सर्वज्ञानक्रियात्मने० मनःकालाय० योगपीठात्मने०॥ इति पीठदेवताः॥ अथ ब्रह्मादीनां
ध्यानपूर्वकमावाहनं कुर्यात्॥ अक्षमालां स्रुवं दक्षे वामे दंडकमंडलुं। दधानमष्टनयनं॥ ॥२४
जन्मध्ये बुजासनं॥ सर्वे चतुर्भुजा देवा वास्तुदेहे व्यवस्थिताः॥ कृतांजलिपुटा ऊर्ध्वे खड्गखेटक

पाणयः॥ ब्रह्माणं संनिरीक्षंते ते तु द्रष्ट्राभिमुखाश्रते॥ स्वस्वस्थानस्थिताश्चैव साधारणमुदाहृतं॥ म
ध्यमपदचतुष्के वास्तोः हृन्नाभ्योर्ब्रह्मणे नमः॥ रक्तवर्णं ब्रह्माणं आवाहयामि॥ इति स्थापयेत्॥
॥ पूर्वपदद्वये दक्षिणहस्ते अर्यम्णे० श्वेतवर्णं अ०॥२॥ दक्षिणपदद्वये जठरदक्षिणे ॐ विवस्वते०
र तें० विवस्वं०॥३॥ पश्चिमपदद्वये जठरवामे ॐ मित्राय० सुवर्णाभं मित्रं०॥४॥ उदक्पदद्वये वाम
हस्ते ॐ पृथ्वीधराय० धूम्रवर्णं पृथ्वीधरं०५॥ आग्नेयपदोत्तरार्धे दक्षिणहस्ते ॐ सावित्राय० धू
म्रवर्णं सावित्रं०६॥ आग्नेयदक्षिणपदार्धे दक्षिणहस्ते॥ सवित्रे० नीलवर्णाभं सवितारं०७॥ नैरृ
त्यपूर्वपदार्धे वृषणयोः विबुधाधिपाय० अरुणवर्णं विबुधाधिपं०८॥ नैरृत्यपश्चिमपदार्धे मेढ्रे
ॐ जयाय० शुक्लवर्णं जयं०९॥ वायव्यपददक्षिणार्धे वामहस्ते ॐ राजयक्ष्मणे० श्वेतवर्णं राजय
क्ष्माणं०१०॥ वायव्यपदोत्तरार्धे वामहस्ते ॐ रुद्राय० शुक्लवर्णं रुद्रं०११॥ ईशानपदपश्चिमार्धे
मुखे ॐ अपानाय० गोक्षीरधवलवर्णं आपं०॥१२॥ ईशानपदपूर्वार्धे उरसि ॐ आपवत्स

य० जपाकुसुमवर्णं आपवत्सं० ॥१३॥ ईशानपदद्दक्षिणार्धे शिरसि ॥ शिखिने० ऽ यद्दिनकूरा
॥२५॥ नं शिखिनं० ॥१४॥ तद्दक्षिणे सार्धपदे दक्षिणनेत्रे ॐ पर्जन्याय० अंजनसंनिभं पर्जन्यं० ॥१५
तद्दक्षिणपदद्वये दक्षिणश्रोत्रे ओं जयंताय० अंजसंकाशं जयंतं० ॥१६॥ तद्दक्षिणपदद्वये द
क्षिणांसे ॐ कुलिशायुधाय० अनलद्युतिं कुलिशायुधं० ॥१७॥ तद्दक्षिणपदद्वये दक्षिणबाहौ
ॐ सूर्याय० रक्तवर्णं सूर्यं० ॥१८॥ तद्दक्षिणपदद्वये दक्षिणबाहुवे । ॐ सत्याय० चित्रवर्णं स
त्यं० ॥१९॥ तद्दक्षिणसार्धपदे दक्षिणकूर्परे ॐ भृशाय० बंधूकपुष्पाभं भृशं० ॥२०॥ तद्दक्षि
णाग्नेयपदार्धे दक्षिणप्रबाहौ ॐ आकाशाय० कुंदपुष्पाभं आकाशं० ॥२१॥ तत्पश्चिमार्धे द
क्षिणबाहुवे ॐ वायवे नः० धूम्रवर्णं वायु० २२ ॥ तत्पश्चिम सार्धपदे दक्षिणमणिबंधे ॐ
पूष्णे० रक्ताभसंनिभं पूषणं० २३ ॥ तत्पश्चिमपदद्वये दक्षिणपार्श्वे ॐ वितथाय० इं
द्रचापाभं वितथं० २४ ॥ तत्पश्चिमपदद्वये दक्षिणपार्श्वे । ओं गृहक्षताय० विद्युद्वर्णाभं

गृहक्षतं० ॥२५॥ तत्पश्चिमपदद्वये दक्षिणहस्ते ओं यमाय० अंजनसंकाशं यमं० ॥२६॥ तत्प
श्चिमपदद्वये दक्षिणजानौ ॐ गंधर्वाय० पद्मरागाभं गंधर्वं० २७ ॥ तत्पश्चिमसार्धपदे दक्षि
णजंघायां ॐ भृंगराजाय० भृंगाभं भृंगराजं० २८ ॥ तत्पश्चिमनैरृत्यपदार्धे दक्षिणस्फि
जि ॐ मृगाय० मेघवर्णं मृगं ॥२९॥ तदुत्तरार्धे पादयोः ॐ पितृभ्यो० पावकवर्णान् पितॄन्०
३०॥ तदुत्तरसार्धपदे वामस्फिजि । ॐ दौवारिकाय० पीतवर्णं दौवारिकं० ॥३१॥ तदुत्तर
पदद्वये वामजंघायां ॐ सुग्रीवाय० नीलकंठाभं सुग्रीवं० ३२ ॥ तदुत्तरपदद्वये वामजानुनि ॐ
पुष्पदंताय० ब्रह्माभं पुष्पदंतं० ॥३३॥ तदुत्तरपदद्वये वामोरौ ॐ वरुणाय० स्फटिकाभं वरु
३४॥ तदुत्तरपदद्वये वामपार्श्वे ॐ शोषाय० उत्पलसंकाशं शोषं० तदुत्तरवायव्यपदार्धे वाममणि
बंधे ॐ पापाय० इंदुनीलाभं पापं० ३७॥ तत्प्राक्पदार्धे वामबाहौ ॐ रोगाय० कृष्णाभं रो
गं० ३८॥ तत्प्राक्सार्धपदे वामप्रबाहौ ॐ अहये० शंखेंदुसंनिभं अहिं० ३९॥ तत्प्राक्पदद्वये
ॐ असुराय० भृंगाभं असुरं० ३५॥ तदुत्तरसार्धपदे वामपार्श्वे ३६॥३

वामकूर्परे। ॐ मुख्यायन०॥ मौक्तिकामुख्यं आवा०॥ ४०॥ तस्याकूपदद्वयेवामवाहौ। ॐ भल्लाटका०

२९ श्वेतपद्मासं भल्लाटकं आ०॥ ४१॥ तस्याकूपदद्वयेवामबाहवे। ॐ सोमाय०॥ स्फटिकसंका

शं सोमं आवा०॥ ४२॥ तस्याकूपदद्वयेवामांशे ओं सर्पायनमः। रक्तोत्पलाभं सर्पं आवा०॥ ४३॥

तस्याकूत्स्यार्धपदे वामश्रोत्रे ॐ आदित्यैनमः। कपिलवर्णां अदितिं आ०॥ ४४॥ तस्यागर्धपदे वा

मश्रोत्रे ओं दित्यै०। कुंदेंदुधवलां दितिं आ०॥ ४५॥ ततः मध्यमपदचतुष्टये ब्रह्मणोत्तरस्यागे सु

वर्णरजतयोर्वा प्रतिमां कलशं वास्तुं ध्यायेत्॥ तद्यथा॥ ईशान्येशिरसं नैरृत्य पदं आग्नेयजानुकं

वायव्य कूर्परं आकुंचितकरं उत्तानं वास्तुपुरुषं ध्यात्वा। आवाहयेत्॥ ॐ भूः वास्तुपुरुषं आ०॥

ॐ भुवः वास्तुपुरुषं आ०। ॐ स्वः वास्तुपुरुषं आ०। ॐ भूर्भुवस्वः वास्तुपुरुषं आ०॥ वास्तोष्प

तेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्। वास्तोष्पत्यावाहनेवि०॥ वास्तोष्पते प्रति०॥ ऋ०॥ ॐ ह्रीं। ॐ नमो

भगवते वास्तुपुरुषाय महाबलपराक्रमाय सर्वदेवाधिदेवाय शान्ततराय शरीराय ब्रह्मपु

त्राय सकलब्रह्माण्डधारिणे भूभारार्पितमस्तकाय पुरपट्टनप्रासादगृहवापीसरःकूपादिसं

निवेशसान्निध्यकराय सर्वसिद्धिप्रदाय प्रसन्नवदनाय विश्वंभराय परमपुरुष स्वरूपा

यस्वत्र शार्दूल(?)वरदाभयहस्ताय वास्तोनमस्ते नमस्ते। एह्येहि भगवान्वास्तोयज्ञेऽस्मिन् सर्वसि

द्धये। तव पूजां विधास्यामि यज्ञविघ्ननिवृत्तये॥ एवमाद्यस्थापयेत्॥ ततो मंडलाद्बहिः

ईशान्ये॥ ॐ चरक्यै०। शंखवर्णां चरकीं०॥ आग्नेये। ॐ विदार्यै०। पवकवर्णां विदारीं०। नै

ऋत्ये। ॐ पूतनायै०। हिमसंकाशीं पूतनां०। वायव्ये ॐ पापराक्षस्यै०। मेघवर्णां पापराक्ष

सीं०। मंडलाद्बहिः॥ पूर्वे ॐ स्कंदाय० श्वेतवर्णं स्कंदं०॥ दक्षिणे अर्यम्णे०। रक्तवर्णं अर्य

मणं०॥ पश्चिमे ॐ जंभकाय० पीतवर्णं जंभकं०॥ उत्तरे ॐ पिलिपिच्छाय०। धूम्रा

वर्णं पिलिपिच्छं०॥ ततेन पूर्वादिदिक्षु॥ इंद्राय० पीतवर्णं इंद्रं०॥ आग्नेये ॐ अग्नये०। र

॥२८॥

क्तवर्णं अग्निं०॥ दक्षिणे यमाय० कृष्णवर्णं यमं०॥ नैर्ऋत्ये निर्ऋतये० नीलवर्णं निर्ऋतिं० पश्चिमे
वरुणाय० श्वेतवर्णं वरुणं० वायव्ये॥ ॐ वायवे० धूम्रवर्णं वायुं०॥ उत्तरे॥ कुबेराय० हरितवर्णं
कुबेरं०॥ ईशान्ये॥ ॐ ईशानाय० श्वेतवर्णं ईशानं०॥ ॐ अनंताय० मेघवर्णं अनंतं०॥ ॐ ब्रह्म
णे० रक्तवर्णं ब्रह्माणं०॥ एवं ब्रह्मादीनां बाह्ये ब्रह्माद्यावाहित देवताभ्यो नमः इत्यासनादयुप
चाराः॥ कांउ अनुसमये नवा संपूज्य वास्तुं पूजयेत्॥ तद्यथा॥ ॐ वास्तुपुरुषाय सांगाय सपरिवारा
य सआसनं समर्पयामि॥ एवं क्रमेण दीपांतं त्वा नैवेद्यं दद्यात्॥ तत्र मंत्रः॥ एह्येहि भगवान्वा
स्तो सांगं सपरिवारं इदं मयोपनीतं नैवेद्यं बलिं गृहाण मम यज्ञमिच्छि द्रं कुरु सकलं दुष्टेभ्यो
रक्षरक्ष स्वाहा॥ वास्तुपुरुषाय सांगाय सपरिवाराय नैवेद्यं समर्पयामि॥ अनेन नैवेद्यामंड
लाद्बहिर्दद्यात् नाममंत्रेण दक्षिणां तानुपचारान् समर्प्य प्रार्थयेत्॥ यज्ञभागं प्रतीक्षस्व पूजां
चैव बलिं मम॥ नमो नस्ते देवेश भवस्वस्तिकरो मम॥ इति प्रार्थ्य॥ चरक्यादीनां नाममं ॥२८॥

त्रेण संपूज्य मंडलस्येशान भागे कलशं मंत्रपूर्वकं संस्थाप्य तीर्थान्यावाह्य वरुणं चावाह्य संपू
ज्य॥ शिवं वा स्त्विति भवंतो ब्रुवंतु॥ एवं यजमानो ब्रूयात्॥ प्रतिशिवं वास्त्विति ते प्रत्यूचुः॥ एवं वा
रत्रयं ब्रूयात्॥ ततः वास्तु कलशोदकेन यजमानमभिषिंच्य मंडलाद्बहिरीशानादिक्रमेण प्राद
क्षिण्येन पायसादीनां श्लोकमंत्रैर्नाममंत्रैर्वा ब्रह्मादिभ्यो बलिदानं कुर्यात्॥ तद्यथा॥ ॐ ब्रह्म
णे० दध्योदनबलिं समर्पयामि॥ इति सर्वत्र॥ अर्यम्णे०२ विवस्वते०३ मित्राय०४ पृथ्वीधराय०
५ सावित्राय० सवित्रे०७ विबुधाधिपाय०८ जयाय०९ राजयक्ष्मणे०१० रुद्राय०११ आपाय०१२ आप
वत्साय०१३ शिखिने०१४ पर्जन्याय० जयंताय०१६ कुलिशायुधाय०१७ सूर्याय०१८ सत्या
य०१९ भृशाय०२० आकाशाय०२१॥ वायवे०२२ पूष्णे०२३ वितथाय०२४ गृहक्षताय०२५
यमाय०२६ गंधर्वाय०२७ भृंगराजाय०२८ मृगाय०२९ पितृभ्यो०३० दौवारिकाय०३१ सुग्रीवा
य०३२ पुष्पदंताय०३३ वरुणाय०३४ असुराय०३५ शोषाय०३६ पापाय०३७ रोगाय०३८ अहये०
३९ मुख्याय०४० भल्लाटाय०४१ सोमाय०४२ सर्पाय०४३ अदित्यै०४४ दित्यै०४५ उत्तरस्यां

दिशिकुलशवास्तुपुरुषायनमः इमंबलिंसमर्पयामि ॥ बाह्यतः एवईशान्यादिकोणे ॥ चरक्यै
विदार्यै॰पूतनायै॰पापराक्षस्यै॰बलिःपूर्वादिदिक्षु ॥ स्कंदाय॰अर्यम्णे॰जंभकाय॰पिलिपिच्छाय॰
बलिःपूर्वादिदशादिक्षु ॥ इंद्राय॰अग्नये॰यमाय॰निर्ऋतये॰वरुणाय॰वायवे॰कुबेराय॰ईशाना
य॰अनंताय॰ब्रह्मणे॰दध्योदनबलिं समर्पयामीतिसर्वत्र ॥ ततोमंडपप्रादक्षिण्येनईशान
कोणादारभ्य ईशानपर्यंतं त्रिसूत्र्यापावमानेनराक्षोघ्नेनचवेष्टयेत् ॥ ततोदुग्धपूर्णयास्त
नकुंभ्यां तथाजलपूर्णयास्तनकुंभ्याचपूर्वसूत्रक्रमेणनाविच्छिन्नधाराद्वयं दत्वाप्रार्थनांकु
र्यात् ॥ यथामेरुगिरेःशृंगंवोस्तोमभमालयेसदा ॥ तथाब्रह्मादिभिर्देवैर्ममयज्ञेस्थिरो
भव ॥ पूजितोसिमयावास्तोगंधाद्यैरुपचारकैः ॥ प्रसीदपाहिविश्वेशदेहिमेयज्ञजंसुखं ॥
इतिवास्तुंप्रार्थ्य ॥ ॥ यांतुदेवगणाःसर्वे॰ ॥ इतियज्ञवास्तुपूजनंसंपूर्णं ॥ अथाचम्यप्राणा
नायम्यदेशकालौस्मृत्वा अद्यअमुककर्मांगभूतंग्रहपीठदेवतास्थापनंकरिष्येइति ॥ २८

संकल्प्य ॥ प्रणवस्यपरब्रह्मऋषिःपरमात्मादेवतादैवीगायत्रीदेव्युष्णिग्दैवीबृहत्यश्छं
दांसि ॥ सूर्याद्यावाहनेवि॰ ॥ तत्रग्रहपीठमध्येवर्तुलेद्वादशांगुलेमंडले प्राङ्मुखंसू
र्यंरक्तपुष्पाक्षतैः ॥ आकृष्णेनहिरण्यस्तूपःसवितात्रिष्टुप् ॥ सूर्यावाहनेवि॰ आकृ
ष्णेन॰ ॥ ॐभूर्भुवस्वः कलिंगदेशोद्भवकाश्यपसगोत्रसूर्यइहागच्छ॰सूर्यं॰ ॥ ततःआ
ग्नेय्यांचतुरस्रेचतुर्विंशांगुलेमंडलेप्रत्यङ्मुखंसोमंश्वेतपुष्पाक्षतैः ॥ आप्यायस्व
गोतमःसोमोगायत्रीसोमावाहने॰आप्यायस्व॰ ॐभूर्भुवस्वः यमुनातीरोद्भवआ
त्रेयसगोत्रसोमइहागच्छ॰सोमं॰ ॥ ततःदक्षिणेत्रिकोणेचतुरंगुलेमंडलेदक्षिणा
मुखंभौमंरक्तपुष्पाक्षतैः ॥ अग्निर्मूर्धाविरूपोंगारकोगायत्री ॥ अंगारकावा॰ अग्नि
र्मूर्धा॰ ॥ ॐभूर्भुवस्वः अवंतिदेशोद्भवभारद्वाजसगोत्रभौमइहागच्छ॰भौमं॰त
तःईशान्येद्विरंगुलेमंडलेबाणाकारेउदङ्मुखंबुधंपीतपुष्पाक्षतैः ॥ उद्बुध्यध्वंबुध

सोम्यो बुधस्त्रिष्टुप्॥ बुधा ना० उद्बुध्यध्वं न्य कू० ॐ भूर्भुवस्वः मगधदेशोद्भव आत्रेयसगो
त्र बुध इहागच्छ० बुधं० ततः उत्तरे दीर्घचतुरस्रे षडंगुले मंडले उदङ्मुखं बृहस्पतिं पीतपु
२१ ष्पाक्षतैः॥ बृहस्पतेत्यस्य गृत्समद बृहस्पतिस्त्रिष्टुप्॥ बृहस्पत्यावाहने० बृहस्पते० न्य कू०॥ ॐ
भूर्भुवस्वः सिंधुदेशोद्भव आंगिरससगोत्र बृहस्पते इहागच्छ० बृहस्पतिं०॥ ततः पूर्वे पंचको
णे नवांगुले मंडले प्राङ्मुखं शुक्रं बिल्वशुक्ल पुष्पाक्षतैः॥ शुक्रः पाराशरः शुक्रो द्विपदा
विराट्॥ शुक्रावा० शुक्रः शुशुक्वान० न्य कू०॥ ॐ भूर्भुवस्वः भोजकटदेशोद्भव भार्गवसगो
त्र शुक्र इहागच्छ० शुक्रं० ततः पश्चिमे धनुषाकारे चतुरंगुले मंडले प्रत्यङ्मुखं शनिं कृष्ण
पुष्पाक्षतैः॥ शमग्निरिति इरिंबिठिः शनिरुष्णिक् शन्यावाहने० शमग्नि० न्य कू० ॐ भूर्भु
वस्वः सौराष्ट्रदेशोद्भव काश्यपसगोत्र शने इहागच्छ० शनिं० ततः नैर्ऋत्ये शूर्पा ॥२१॥
कारे मंडले पंचविंशांगुले दक्षिणाभिमुखं राहुं कृष्णगंधपुष्पाक्षतैः॥ कयानो वामदे

वो राहुर्गायत्री॥ राह्वावाहने० कया न० न्य कू०॥ ॐ भूर्भुवस्वः बर्बरदेशोद्भव पैठीनसगो
त्र राहो इहागच्छ० राहुं०॥ ततः वायव्ये ध्वजाकारे पंचविंशांगुले मंडले दक्षिणामुखं केतुं धूम्र
गंधाक्षतैः॥ केतुं मधुच्छंदाः केतुर्गायत्री॥ केत्वावाहने० केतुं कृण्वन्० न्य कू०॥ ॐ भूर्भुव
स्वः अंतर्वेदिसमुद्भव जैमिनिसगोत्र केतो इहागच्छ० केतुं० अथ अधिदेवताः॥ त्र्यंबकं वसि
ष्ठो रुद्रो नुष्टुप्॥ ईश्वरावाहने० त्र्यंबकं० न्य कू०॥ ॐ भूर्भुवस्वः रुद्र इहागच्छ० रुद्रं० सूर्यद
क्षिणपार्श्वे रुद्रं आवाहयामि॥ गौरीर्मिमाय दीर्घतमा उमा जगती॥ उमावाहने० उमे इहागच्छ
सोमदक्षिणपार्श्वे उमां आवा०॥ यदक्रंद दीर्घतमा स्कंदस्त्रिष्टुप्॥ स्कंदावा० ॐ भूर्भु स्कं
द इहागच्छ० भौमदक्षिणपार्श्वे स्कंदं आवा०॥ विष्णोर्नुकं दीर्घतमा विष्णुस्त्रिष्टुप्॥ ॐ
भूर्भुवस्वः विष्णो इहागच्छ० बुधदक्षिणपार्श्वे विष्णुं०॥ ब्रह्मजज्ञानं गोतमो वामदेवो ब्र
ह्मा त्रिष्टुप्॥ ब्रह्म० न्य कू०॥ ॐ भूर्भुवस्वः ब्रह्मन् इहागच्छ० गुरुदक्षिणपार्श्वे ब्रह्माणं० इं
द्रं वो मधुच्छंदा इंद्रो गायत्री॥ इंद्रावाहने० इंद्रं वो न्य कू० ॐ भूर्भुवस्वः इंद्र इहागच्छ०

॥३०॥

मंगुदक्षिणपार्श्वे इंद्रं० यमायसोमं यमोयमो नुष्टुप् ॥ यमावाहने० यमायसोमं० मंत्रः ॥
ॐ भूर्भुवस्वः यम इहागच्छ० रानिदक्षिणपार्श्वे यमं० मोषुणो घोरः कारणकः कालो गायत्री ॥ कालावाहने वि० मोषुणः० मंत्रः ॐ भूर्भुवस्वः काल इहागच्छ० राहुदक्षिणपार्श्वे कालं० ॥ उषोवाजं मंत्रः ब्रह्म चित्रगुप्तो बृहती ॥ चित्रगुप्तावाहने वि० उषोवाजं मंत्रः ॐ भूर्भुवस्वः चित्रगुप्त इहागच्छ० केतुदक्षिणपार्श्वे चित्रगुप्तं आवाहयामि ॥ अग्निं का ण्वो मेधातिथिरग्निर्गायत्री ॥ अग्न्यावाहने वि० अग्निं दूतं० मंत्रः ॥ ॐ भूर्भुवस्वः अग्ने इहागच्छ० सूर्यवामपार्श्वे अग्निं० अप्सु मे धातिथिरापोनुष्टुप् अबावाहने वि० अप्सु मे० ॐ भूर्भुवस्वः आपः इहागच्छतु सोमवामपार्श्वे अपः आवा० स्योनामेधातिथिर्भूमिर्गायत्री ॥ भूम्यावाहने वि० स्योनापृथिवि० ॐ भूर्भुवस्वः भूमे इहागच्छ० भौमवामं० भूमिं० इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री ॥ विष्ण्वावाहने वि० इदं विष्णुः० ॐ भूर्भु

॥३०

वस्वः विष्णो इहागच्छ० बुधस्य दक्षिणवामपार्श्वे विष्णुं० ॥ इंद्र श्रेष्ठानि गृत्समद इंद्रस्त्रिष्टुप् ॥ इंद्रावाहने० इंद्र श्रेष्ठानि मंत्रः ॥ इंद्र इहागच्छ० बृहस्पतिवामपार्श्वे इंद्रं० ॥ इंद्राणी रिषाकपिरिंद्राणी पंक्तिः इंद्राण्यावाहने० ओं इंद्राणीमासु० ॥ ओं भूर्भुवस्वः इंद्राणि इहागच्छ० शुक्रवाम० इंद्राणीं० ॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् प्राजापत्यावाहने वि० प्रजापतेः मंत्रः ॥ ओं भूर्भुवस्वः प्रजापत इहागच्छ० शनिवाम० प्रजापतिं ॥ ब्रह्म मा सार्पं० आयंगोः सार्पराज्ञी सर्पा गायत्री ॥ सर्पावा० आयंगोः० ॐ भूर्भुवस्वः सर्पाः इहागच्छत० राहुवामपार्श्वे सर्पान् ॥ ब्रह्मजज्ञानं गोतमो तमदेवो ब्रह्मा त्रिष्टुप् ॥ ब्रह्मावाहने वि० ब्रह्मन् इहागच्छ० केतुवामपार्श्वे ब्रह्माणं आ० ॥ इति अधिप्रत्यधिदेवताः ॥ गणानां त्वा गृत्समदो गणपतिर्जगती ॥ गणपत्यावाहने वि० ओं भूर्भुवस्वः विनायक इहागच्छ० राहुरुत्तरतः विनायकं०

जातवेदसेकश्यपोदुर्गात्रिष्टुप्॥दुर्गावाहने वि०॥जातवेदसेऋक्॥ओं भूर्भुवस्वः दु
र्गे इहागच्छ०शनिरुत्तरतो दुर्गां॥तववायोव्यश्वांगिरसो वायुर्गायत्री॥वायावाह
ने वि०॥तववायवृतस्पतेऋक्॥ॐ भूर्भुवस्वः वायो इहागच्छ०॥रवेरुत्तरतः वायुं आ०
आदित्यस्त्वा वात्रो गायत्री॥आकाशावाहने वि०॥आदित्यत्नस्यऋक्॥ॐ भूर्भुवः
स्वः आकाश इहागच्छ०राहुर्दक्षिणतः आकाशं०एषो उषा प्रस्कण्वोऽश्विनो गायत्री॥
अश्व्यावाहने वि०एषो उषाऋक्॥ॐ भूर्भुवस्वः अश्विनो इहागच्छतं०केतुर्दक्षिण
तः अश्विनो०॥इति पंचलोकपालपूजनं॥क्षेत्रस्यवामदेवः क्षेत्राधिपतिरनुष्टुप्क्षे
त्रपालावाहने वि०क्षेत्रस्यपतिनाऋक्॥ॐ भूर्भुवस्वः क्षेत्रपाल इहागच्छ०उत्तरे क्षे
त्रपालं आ०॥वास्तोष्पतेवसिष्ठो वास्तोष्पतिस्त्रिष्टुप्॥वास्तोष्पत्यावाहने वि०वा ॥३५॥
